ISSN – 2349-3100 Peer Reviewed

दशमोऽङ्कः Refereed Journal

अन्ताराष्ट्रियमूल्यांकितत्रैमासिकसन्दर्भितशोधपत्रिका

# वेदज्योतिष्मती

## Vedajyotishmati

**संरक्षकाः**

**प्रो. रामचन्द्रझाः, प्रो. रामदेवझाः,**

**प्रो. देवेन्द्रमिश्रः, प्रो. शिवाकान्तझाः**

**प्रधानसम्पादकः**

**प्रो. हंसधरझाः**

आचार्यः, ज्यौतिषविभागः, राष्ट्रियसंस्कृतसंस्थानम्

भोपालपरिसरः।

**सम्पादकः**

**डॉ. आशीषकुमारचौधरी**

असिस्टेंट-प्रोफेसर, ज्यौतिषविभागः,

क.जे.सोमैया संस्कृतविद्यापीठम्, मुम्बई।

**प्रकाशकः**

**संस्कृत-अनुसंधान-संस्थानम्, के. एम. टैंक लहेरियासरायः, दरभंगा**

## सम्पादकमण्डलम्

**1 प्रो.बोधकुमारझाः**
आचार्य, व्याकरण-विभाग,
क. जे. सोमैया-संस्कृतविद्यापीठ, मुम्बई ।

**2 प्रो. हंसधरझाः**
ज्योतिष विभाग ,आचार्य,
राष्ट्रिय संस्कृत संस्थान , भोपाल परिसर, भोपाल।

**3 प्रो. प्रमोदवर्धनकौण्डिल्यायनः,**
विभागाध्यक्ष, मीमांसा दर्शन विभाग नेपाल,
नेपाल संस्कृत विश्वविद्यालय, काठमाण्डु, नेपाल ।

**4 जूही जेनोजे**
आचार्या,दर्शन विभाग,
कोरिया विश्वविद्यालय, सीओल, कोरिया ।

**5 डॉ. प्रवेशसक्सेना**
पूर्व आचार्या,संस्कृत विभाग,
जाँकिर हुसैन महाविद्यालय
दिल्ली विश्वविद्यालय।

**6 डॉ. धनञ्जयमणित्रिपाठी**
आचार्य ,संस्कृत विभाग,
मोदी विश्वविद्यालय, राजस्थान ।

**7 डॉ. दिलीपकुमारझाः**
विभागाध्यक्ष-धर्मशास्त्र विभाग
कामेश्वर सिंह संस्कृत विश्वविद्यालय, दरभंगा ।

**8 डॉ. राजीवमिश्रः**
प्राचार्य, सन्तनागपाल संस्कृतमहाविद्यालय,
एवं शोध संस्थान, सम्पूर्णानन्दसंस्कृत
विश्वविद्यालय, नई दिल्ली।

**9 टेल्टो डेल्टेज**
आचार्य दर्शन एवं संस्कृति विभाग,
हेल्डमार्ग विश्वविद्यालय,हेल्डनवर्ग, जर्मनी।

**10 प्रो. विद्यानन्द झाः**
प्राचार्य,
भोपाल परिसर, भोपाल।

**पुनर्वीक्षणमण्डलम्**

1. **आचार्यरामदेव झाः**
पूर्व आचार्य ज्योतिष विभाग,
लालबहादुर शास्त्री, राष्ट्रिय संस्कृत विद्यापीठ, दिल्ली ।
2. **आचार्य नीलाम्बर चौधरी**
आचार्य रामभगत राजीवगाँधी महाविद्यालय दरभंगा।

**3 आचार्या प्रवेश सक्सेना**
आचार्या ,जाँकिर हुसैन महाविद्यालय
दिल्ली विश्वविद्यालय,दिल्ली।

**प्रबंधक संपादक**
1. **श्री पंकज ठाकुर**

**परापर्शदातृसंपादकः**
1. **डॉ. रंजय कुमार सिंह**
रा. सं. संस्थान, मुम्बई।

**सहसंपादिका**
**1डॉ गीता दूबे** ,रा. सं. संस्थान, मुम्बई।

**सम्पादकसहायकः**
**श्रीसत्यनारायणः**

**वर्षम्-** AUG 2016
@copy right – Sanskrit Anusandan Sansthan
Email – rsas.kothram@gmail.com, vjvv.rs@gmail.com,
Ph No. 06272-224671, 09619269812, 07506137027 **मूल्य**-300/

पत्रिका में प्रकाशित लेखों से प्रकाशक का सहमत होना अनिवार्य नहीं है। विवाद का समाधान दरभंगा न्यायालय से ही स्वीकार्य है ।लेखों को परिवर्तित, स्वीकृत एवं अस्वीकृत करने का पूरा अधिकार प्रकाशक को होगा ।A Trilingual Educational Sanskrit Research Journal Published by the Sanskrit Anusandhan Sansthan, Darbhanga

**From letter no-671/2014-15 Place on Rashtriya Sanskrit Anusandhan Sansthan will kown as the Sanskrit Anusandhan Sansthan, Darbhanga**

 ISSN – 2349-3100

डा. नारायणन्. ई. आर्.,
वरीयान् सहायकाचार्यः,
राष्ट्रियसंस्कृतसंस्थानम्,
क. जे. सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई-४०००७७.

# शुभाशंसा

**मिहिरस्तूष्णैः किरणैः पोषयत्यजस्रं जीवजलजानि।**
**भ्रमयति परितः सकलान् ग्रहांस्तस्मै हि नमो नित्यम्।।**

वेदस्यैव हि ज्ञानज्योतिष्मत्त्वे तदङ्गानामुपभास्यत्वे पुराणेतिहासानां काव्यानां कलानां शास्त्रदर्शनादीनां च तत्परत्वमनुभववेद्यमेव। सोऽनुभवो ज्ञानात्मकः प्रकाशस्वरूपश्च। तादृशज्ञानार्जनं नालिकेरफलास्वादपूर्ववर्त्तियत्नकल्पं कल्पते परं क्लेशाय। मधुरेव ज्ञानफला मिहिरकिरणप्रोञ्छिततिमिर-मिवोन्मूलिताविद्या वेदविद्याया धारा ज्योतीरूपा नरीनर्ति जगत्त्रये। विद्यैव वाग्देवता सा सतां जीह्वासु लसतितराम्।

प्रकृते पत्रिकाकृतिर्हि तत्संस्कारावगाहिनी वेदज्योतिष्मतीत्यन्वर्था-भिधानवती पुनरपि प्रकाशपदवीमारोहतीति कस्य वा न मोदास्पदम्। तत्पावन-वृत्तिमताऽऽत्ममित्रेण कार्तान्तिकमौक्तिकेनेवोपेयिवता कृतकृत्यतां गृहस्थेनापि परित्यक्तालस्यपरिवारेणेवाशीर्वादपात्रेण गुरूणां नैकेषामाशीषकुमारेण जात्या चतुर्धुरीणेनाऽपि चतुरमधुरभाषिणा वेदज्योतिष्मत्या दशमी प्रखण्डिका प्रकाश्यते। ज्योतिर्विद्याचुञ्चुरयमाशीषकुमारो युवा चिरं नक्षत्रविद्यां पोषयिष्यतीत्याशासते लौकिकाः। इत्याङ्गिरसाम्बरीषयौवनाश्वगोत्रजनुषो नारायणस्य। ओं तत् सत्।।

डा. नारायणन्. ई. आर्.

 ISSN – 2349-3100

# सम्पादकीयम्

वेदो निखिलेऽपि संसारे प्राचीनतमो ग्रन्थोऽस्तीत्यत्र न कस्यापि विप्रतिपत्तिः। स च वेदो ज्ञानपुञ्ज एव। ज्ञानमयो वेदोऽपौरुषेय इति शास्त्रराद्धान्तः, ज्ञानस्यानाद्यनन्तत्वात्। तस्यैव हि ज्ञानमयस्य वेदपुरुषस्य व्याकरण-ज्योतिष-निरुक्त-कल्प-शिक्षा-छन्दश्शास्त्राणि सन्ति षडङ्गानीत्यपि नाविदितं विदाम्। अतश्शास्त्रैरेतैर्वेदस्याङ्गाङ्गिभाव इत्यपि स्पष्टमेव। वेदोऽखिलो धर्ममूलमित्याप्तवचनेन समग्रस्य मानवमात्रस्याभ्युदयनिःश्रेयससाधको वेद एव। एवम्भूतस्य श्रेयोमार्गप्रदर्शकस्य वेदस्य अङ्गभूतशास्त्राणां संरक्षणं संवर्धनं वा नूनमेव श्रेयस्कर्म। तादृक्श्रेयस्कर्मणे प्रवर्तिता अन्ताराष्ट्रिय-मूल्याङ्कित-त्रैमासिक-सन्दर्भित-शोधपत्रिका वेदज्योतिष्मतीनामधेयाऽऽराष्ट्रं वेदज्ञानज्योतिः प्रकाशयन्ती राराज्यत इति महद्धर्षपदम्। तत्राप्यैषमो वेदज्योतिष्मत्या दशमाङ्कोऽपि नियतकालेनैव प्राकाश्यमेतीति परमहर्षस्थानम्। आशासे विविधशास्त्रपारावारपारङ्गतानां देशदेशान्तरख्यातयशस्कानां विदुषां गभीरज्ञानोद्भाषितैश्शोधलेखैर्गुम्फितोऽयं दशमाङ्कोऽपि पाठकानां स्वान्ताह्लादकारी स्यादिति।

तदत्र प्राथम्येन ज्ञापयामि साभारं कार्तज्ञ्यं तेभ्यः सर्वेभ्योऽपि समादरणीयेभ्यो ज्ञानोपासकेभ्यो बुधवरेभ्यः, ये खलु स्वीयामूल्यशोधलेखैरङ्कमिमं विभूषितवन्तः। ततः परं साशीर्वादं साधुवादं ददामि समुत्साहिने सम्पादकाय युवपण्डिताय श्रीमते डॉ. आशीषकुमारचौधरीमहोदयाय, यस्य सत्परिश्रमेण दशमाङ्कोऽयं मूर्तरूपतां समनुप्राप्तोऽस्ति। अन्ते च तेभ्यः सर्वेभ्यो जनेभ्योऽपि हृदयेन साधुवादं वच्मि यैः खलु प्रत्यक्षमप्रत्यक्षं वा विहितमत्र साहाय्यम्।।

पर्यन्ते प्रार्थये भगवन्तं भूतभावनं भवम् -

**वेदज्योतिष्मतीत्यस्याः पत्रिकायाः सतां प्रियः ।**
**दशमाङ्कोऽपि लोके स्याच्चिरं चित्तानुरञ्जकः।।**

गुणैकपक्षपातिनां सहृदयानां विदुषां शुभाशंसनं प्रतीक्षमाणः-

(प्रो. हंसधर झाः)

**प्रधानसम्पादकः**

ISSN – 2349-3100

विषयसूची पृष्ठसंख्या


| | | |
|---|---|---|
| सम्पादकीयम् | प्रो. हंसधर झाः | 4 |
| विद्मस्तं मोहहानतः | डॉ. आर्.बालमुरुगन् | 6 |
| संस्कृताप्लाविता नूनं दिव्या भारतसंस्कृतिः | प्रो.हंसधरझाः | 11 |
| चरखण्डानयनविधिः | विजयानन्दः अडिगः बि. | 14 |
| संस्कृतमहिमा गरीयसी | डॉ . मोहिनी अरोरा | 19 |
| अलङ्कारस्य व्यापकत्वम् | विभवकुमारझाः | 23 |
| कविकीर्तेः अक्षय्यता | श्री. जीतेन्द्रकुमारगुप्तः | 25 |
| विवाहमेलापकीयं कूटैतिह्यम् | डा.गणेशत्रिपाठी | 27 |
| ब्रह्मचर्याश्रमस्य कर्त्तव्यम् | डा.आशीष कुमार चौधरी | 29 |
| THE EDITORIAL PROBLEMS IN THE SAANKHYAKAARIKAA | Dr. Narayanan E. R. | 32 |
| FACEBOOK AS A TOOL FOR ACADEMIC LIBRARY SERVICES: PROBLEMS AND PROSPECTS | Rautmale Anand S. | 35 |

 ISSN – 2349-3100

# विद्मस्तं मोहहानतः

## (अविद्याखण्डसाक्षात्कारयोः नाश्यनाशकभावविचारः)

✍ डॉ. आर्.बालमुरुगन्

**उपोद्घातः -** दुःखाभितप्तान् सामाजिकानुद्धर्तुं परमकारुणिकैः महर्षिपुङ्गवैः दर्शनानि प्रणीतानि। एषां सर्वेषामपि परमपुरुषार्थस्य मोक्षस्य संसिद्धौ निमित्तप्रतिपादनमेव परमं प्रयोजनं वर्तते। संस्कृतवाङ्मये विलसत्सु सांख्यं, योगः, वैशेषिकं, न्यायः, मीमांसा, वेदान्तः चेति षडास्तिकदर्शनेषु मध्ये वेदान्तदर्शनं निरतिशयं स्थानं बिभर्तीति विदितचरमेव विद्वत्तल्लजानाम्। जीवः ब्रह्मैव नापरः इति वेदान्तिनां सिद्धान्तः । अत एव स्वरूपानन्दावाप्तिरेव परमपुरुषार्थः इति वेदान्तिनः प्रतिपादयन्ति। प्रपञ्चे विद्यमानानां समेषां पदार्थानां उपादानकारणं (मूलकारणं) भवति ईश्वरस्य उपाधिभूतमूलाविद्या। मूलाविद्यायाः नाशेन मोक्षः संपद्यते, मूलाज्ञाननाशं प्रति तत्वमस्यादिमहावाक्यजन्यः अखण्डसाक्षात्कारः हेतुः इति वेदान्तपन्थाः । वेदान्तशास्त्रं श्रुतिप्रस्थानं, स्मृतिप्रस्थानं, सूत्रप्रस्थानमिति त्रिधा विभक्तं वर्तते। तत्र स्मृतिप्रस्थानमिति नाम्ना विश्रुतायां श्रीमद्भगवद्गीतायां द्वितीयाध्याये ऊनत्रिंशतः श्लोकस्य विवरणसन्दर्भे अखण्डसाक्षात्कारेण मूलाविद्यानाशोत्पत्तिं विशेषप्रकारेण वर्णयामासुः गीतायाः गूढार्थदीपिकानामकव्याख्याकाराः श्रीमधुसूदनसरस्वतीस्वामिपादाः। स्वयं प्रतिपादितस्य विशेषार्थस्य उपोद्बलकतया बृहदारण्यकोपनिषद्ः श्रीशङ्कर-भगवत्पादभाष्यस्य विवरणभूतं श्रीसुरेश्वराचार्याणां वार्तिकमपि तेऽनूदितवन्तः। अनूदितवार्तिकस्यार्थनिर्णये स्थूलतयावलोकने काचनानुपपत्तिः समुन्मिषति, तस्याः अनुपपत्तेः परिहाराय प्रबन्धेऽस्मिन् प्रत्यनमहं समाश्रितवान्।

**आश्चर्यवत्पश्यतीति श्लोकार्थविवरणम्- (श्रीमद्भगवद्गीतामाहात्म्यम् )-** भगवता श्रीकृष्णेन अर्जुनं प्रति महाभारतयुद्धे आत्मतत्वविनिश्चयार्थ-मुपदिष्टा गीता अष्टादशाध्यायैः विभक्ता वर्तते। भगवता श्लोकरूपेण उपदिष्टत्वादेव इयं श्रीमद्भगवद्गीतेति नाम्ना प्रसिद्धा। गीतायाः मोक्षप्राप्तिरेव प्रयोजनं भवति। श्रीमधुसूदनसरस्वतीस्वामिपादैः स्वव्याख्यानस्योपक्रमे एव गीतायाः प्रयोजनं स्वरूपञ्चैवं वणितमस्ति ।यथा -

**" परं निःश्रेयसं गीताशास्त्रस्योक्तं प्रयोजनम्।। यत्प्राप्तये समारब्धाः वेदाः काण्डत्रयात्मकाः।। कर्मोपास्तिस्तथा ज्ञानमिति काण्डत्रयं क्रमात्। तद्रूपाष्टादशाध्यायैः गीता काण्डत्रयात्मिका ।। "** इति (गूढार्थदीपिका - प्रथमाध्यायः 2, 3, 4 श्लोकाः)

गीतायां उपनिषत् कल्पतया व्यवहारः विद्यते। एवं ब्रह्मविद्या इति गीता विख्याता। अत एव प्रत्यध्यायोपसंहारे एवं दृश्यते - " इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे (अमुक) अध्यायः संपूर्णः " इति।

**गूढार्थदीपिकावैशिष्ट्यम् :-** गीतायाः असंख्यव्याख्यानेषु सत्स्वपि श्रीमधुसूदनसरस्वतीस्वामिपादैः रमणीयशैल्या विरचिता न्यायपरिष्कारैश्च घटिता विशदविवरणरूपा गूढार्थदीपिका गीताविवरणमण्डले पूर्णेन्दुरिव जाज्वलति। तस्मादेव विद्वज्जनैः महता आदरेण समाद्रियमाणेयं वर्तते। श्रीशङ्करभगवत्पादानां गीताभाष्याधारेणैव एभिः इयं व्याख्या संरचितेति मङ्गलश्लोकेनैवावगम्यते।यथा-**" भगवत्पादभाष्यार्थमालोच्यातिप्रयत्नतः। प्रायः प्रत्यक्षरं कुर्वे गीतागूढार्थदीपिकाम् ।।"** इति (गूढार्थदीपिका - प्रथमाध्यायः 1 श्लोकः)संपूर्णगीतायाः प्रतिपाद्यविषयान् श्रीमधुसूदनसरस्वतीस्वामिपादाः इत्थं संगृहीतवन्तः। यथा **"तत्र तु प्रथमे काण्डे कर्म तत् त्यागवर्त्मना। त्वं पदार्थो विशुद्धात्मा सोपपत्तिः निरूप्यते।। द्वितीये भगवद्भक्तिनिष्ठावर्णनवर्त्मना। भगवान्परमानन्दः तत्पदार्थोऽवधार्यते । तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम्।।"** (गूढार्थदीपिका - प्रथमाध्यायः 8, 9, 10 श्लोकः) इत्थमतिप्रशस्ताद् गूढार्थदीपिकाव्याख्यानाद् "आश्चर्यवत्पश्यतीति" श्लोकस्य विवरणम् ।

**सङ्गतिः -** अर्जुनः युद्धक्षेत्रे भीष्मादीन् बन्धुगुर्वादिजनान् दृष्ट्वा तेषां विरोधे योद्धुमसमर्थः किं कर्तव्यतामूढस्सन् भगवन्तं श्रीकृष्णमेव शरणं गच्छति। अत एव स्वयं अर्जुनः वक्ति-

**"यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ।।"** इति। (गीता - द्वितीयाध्यायः 7 श्लोकः ।)

 ISSN – 2349-3100

अतः अर्जुनस्य विषादः (विलापो वा) भवति गीतायाः प्रथमाध्यायस्य सारः। भगवान् श्रीकृष्णः अर्जुनस्य परिदेवनायाः निमित्तं पृच्छति। किं आत्मानं निमित्तीकृत्य रोदसि उत शरीरम्। नाद्यः। यदि आत्मा तव विलापस्य निमित्तं स्यात् तदा तव रोदनं निरर्थकं भवति। तथाहि आत्मा नित्यः इति आत्मनः नाशः न केनापि कदापि कर्तुं शक्यः। अतः अविनाशिवस्तुनः नाशभिया विलपनमनुचितमिति समादधति।यथा -**"अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्। विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति।।"** इति । (गीता - द्वितीयाध्यायः 17 श्लोकः)

यदि मम शोकस्य निमित्तानि भूतसंघातात्मकानि शरीराणि भवन्तीति अर्जुनः वदति तदा शरीराणां स्वभावमवबोधयित्वा तेषु शोकः न कर्तव्यः इति भगवता समादीयते।तथाहि-

**"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत। अव्यक्तनिधनान्येव तत्र का परिदेवना ।।"** इति।

(गीता - द्वितीयाध्यायः - 28 श्लोकः)

पृथिव्यादीनि पञ्चभूतानि शरीराणां कारणानि भवन्ति। स्वस्य उत्पत्तेः प्राक् शरीरं पञ्चभूतेष्वेव लीनं आसीत्। अतः भूतानि - शरीराणि अव्यक्तादीनि भवन्ति। अव्यक्तं - अदर्शनं, (अनुपलब्धिर्वा) आदिः उत्पत्तेः पूर्वं, येषां तानि अव्यक्तादीनीत्यर्थः। शरीराणि जन्मनः प्रागनुपलब्धान्यासन् । एवमव्यक्तनिध- नान्येव अव्यक्तमेव अदर्शनमेव, निधनं - मरणं, (नाशः) येषां तानि - इत्यर्थः। तथा च जन्मनः प्रागनुपलब्धानि मरणानन्तरञ्च भूतेषु एव लीयन्ते इति कारणात् मरणानन्तरञ्चानुपलब्धानि केवलं मध्यकाले (जन्मनः अनन्तरं, मरणात्प्राक् च) पञ्चभूतमयानि शरीराणि उपलभ्यमानानि (दृष्टिगोचरानि) भवन्ति।

अतः अत्यन्तं तुच्छेषु शोकः नोचितः। यतः तव (अर्जुनस्य) बाणप्रहारं विनैव भीष्मादीनां शरीराणां नाशः अवश्यं स्वयमेव कालक्रमेण भविष्यति। एवं सति मिथ्याभूतेषु शरीरेषु का परिदेवना इति। (किं प्रयोनमित्यर्थः) अत्र **"आदावन्ते च यन्नास्ति वर्तमानेपि तत्तथा"** इति न्यायेन मध्यकालेपि शरीराणि न सन्तीति सूचितम्। तदुक्तं भगवता-

**"तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।।" इति ।** (गीता - द्वितीयाध्यायः 27 श्लोकः)

**आश्चर्यवत्पश्यतीति श्लोकस्य विवरणम् -** भगवतः समाधाने तृप्तिमलभमानः अर्जुनः पुनरेवमाक्षिपति। तथाहि येषां पण्डितानां शरीरमनित्यं विनाशस्वभावं, तदन्यः अविनाशी (नित्यः) आत्मा अस्तीति विवेकधीः वर्तते तेऽपि विद्वांसः स्वजनानां पुत्रबन्धुमित्राणां निधने उत्कटं शोचन्ति। अतः अतिसामान्यं मामेव (अर्जुनमेव) पौनःपुन्येन किमर्थमुपालभसे। एवं **"वक्तुरेव हि तज्जाड्यं श्रोता यत्र न बुध्यते"** इति न्यायेन आत्मस्वरूपोपदेशपराणां शास्त्राणामनवगमे बोद्धुः दोषापेक्षया प्रतिपादकपुरुषादीनां दोषः श्रद्धेयः इति। अर्जुनस्येमौ आक्षेपौ मनसि निधाय प्रथमः आक्षेपः एवं समाहितः भगवता यत् - येषां आपाततः विवेकज्ञानमस्ति न तत्कार्यसाधकं भवति। (दुःखानुत्पत्तिप्रयोजकं न भवतीत्यर्थः।) अर्थात् यादृशं विवेकज्ञानमपेक्षितं न तादृशं विवेकज्ञानं त्वया (अर्जुनेन) पण्डितः इति परिलक्ष्यमानेषु वर्तते। अत एव तेऽपि संकटे संप्राप्ते सति भृशं शोचन्ति। दुःखानुत्पत्तिप्रयोजकविवेकज्ञानप्राप्तिप्रकारः मयैव वक्ष्यते। अतः न प्रथमदूषणस्यावकाशः। एवं आत्मनः दुर्विज्ञेयत्वात् (आत्मा तादृशः पदार्थः यस्य तत्वं अतिमहता परिश्रमेणैवाधिगन्तुं शक्यते इति भावः।) आत्मतत्वबोधकशास्त्राणि दुर्बोधानि भवन्ति। तस्मान्न द्वितीयदूषणमपि इत्येवं दूषणद्वयं समाधाय आत्मनः दुर्विज्ञेयत्वन्निरूपयितुमुपक्रमते भगवान्। यथा-

**"आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद् वदति तथैव चान्यः । आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद नैव कश्चित् ।।"** इति ।।

(गीता द्वितीयोध्यायः - 29 श्लोकः।)

कश्चिद् एनं आश्चर्यवत् पश्यति। तथैव चान्यः इत्यत्र चकारेण एनमित्यनुकर्षणम्। तथा च अन्यः तथैव एनं वदति, अन्यः एनं आश्चर्यवच्च शृणोति। कश्चित् नैव एनं श्रुत्वापि वेद इत्यन्वयः अत्र विवक्षितः। आश्चर्येण (अद्भुतेन) तुल्यं आश्चर्यवत्। अथवा आश्चर्येण तुल्यतया वर्तमानमाश्चर्यवत्। स्थूलतयाऽवलोकने श्लोके सर्वत्र क्रियापदेनैवाश्चर्यपदस्य समभिव्याहाराद् धात्वर्थे (क्रियायां) एव आश्चर्यवदिति विशेषणमिति भाति। परन्तु श्रीमधुसूदनसरस्वतीस्वामिपादाः क्रियायां कर्मणि तथा कर्तरि चेति त्रिषु पदार्थेषु आश्चर्यवदिति विशेषणमिति व्यवास्थापयन् । तदिदानीं क्रमशः व्युत्पादयिष्यामि। आदौ कर्मणि आश्चर्यवत्वविशेषणं प्रतिपादयामि। सविषयार्थकधातुयोगस्थले धात्वर्थस्य ज्ञानादेः विषयः एव कर्म भवति। प्रकृते आत्मदर्शनस्य विषयः आत्मैव कर्म इत्यनेन तद्गतमाश्चर्यवत्वं एवं वर्तते। एनं प्रकृतमात्मानं आश्चर्येण तुल्यतया वर्तमानं पश्यतीत्यर्थः। परमात्मनः स्वरूपमेवाश्चर्येण-तुल्यं भवतीत्यर्थः अत्र विवक्षितः। तथाहि परब्रह्म आविद्यकनानाविधविरुद्धधर्मवत्तया सत्, एवं स्वप्रकाशचैतन्यस्वरूपं, आनन्दं, निर्विकारं, नित्यं, नित्यमुक्तस्वभावञ्च वर्तते।

ISSN – 2349-3100

अतः ईदृशं यदात्मनः स्वरूपं तदाश्चर्यवदिति भावः। इदानीं क्रियायामाश्चर्यवदिति विशेषणस्यान्वयं विवृणोमि। कश्चिदाश्चर्यवत् पश्यति। कस्यचित् पुरुषस्य यद्दर्शनं तदाश्चर्यवदित्यर्थः। तथाहि स्वरूपतो मिथ्याभूतमपि स्वात्मदर्शनं सत्यस्य व्यञ्जकं, अविद्याजन्यतया आविद्यकमप्यविद्यायाः विघातकं, (नाशकम्) अविद्यायां नष्टायां तत्कार्यतया स्वात्मानमप्युपहन्ति। (नाशयति) अतः आत्मदर्शनमाश्चर्यवद् भवति। कश्चिदेव एनं पश्यति न सर्वः इति यः कश्चिद् द्रष्टा सः आश्चर्यवदिति कर्तरि विशेषणं विविक्षितं वर्तते। तथाहि आत्मसाधनार्थं यतमानेषु असंख्यजनेषु मध्ये कश्चिदेकः महापुरुषः अनेकजन्मसु अनुष्ठितसुकर्मणां अनन्तानां फलरूपेण शमदमादिसाधनचतुष्टयेन सुसंपन्नः सत्कर्मपरंपराभिः (विशुद्ध) निर्मलान्तःकरणः सद्गुरुमुपेत्य शास्त्राचार्योपदेशाभ्यां आविद्यकसर्वद्वैतनिषेधेन परमात्मस्वरूपमात्राकारां वेदान्तमहावाक्यजन्यां अखण्डाकारवृत्तिं निर्विकल्पसाक्षात्काराख्यामाप्नोति। अतः यः कश्चिदीदृशः द्रष्टा सः आश्चर्यवदेव भवतीति भावः।

तथैव चान्यः आश्चर्यवद्वदति इत्यत्रापि प्रागुक्तदिशा कर्मक्रियाकर्तृषु त्रिषु आश्चर्यवदिति विशेषणं भवति। अत्र सर्वत्रापि कर्मविषयः परमात्मैव भवति। तत्र विद्यमानमाश्चर्यवत्वं व्याख्यातपूर्वमेवेति न पुनः तस्य विवरणापेक्षा वर्तते। अतः क्रियायां आश्चर्यवत्वन्निरूप्यते। **"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"** इति श्रुतिबलाद् ज्ञायते शुद्धः आत्मा न केनापि शब्देन बोधयितुं शक्यः इति। तथा च सर्वशब्दावाच्यस्य शुद्धस्यात्मनः यद्वचनं तदाश्चर्यवद् भवति। कर्तरि विशेषणमित्थं वर्तते। यः आत्मानं जानाति (पश्यति) स एव ध्रुवमन्येभ्यः उपदेष्टुं प्रभवति, एवं यथा जानाति तथैव उपदिशति। अतः उक्तं तथैव चान्यः वदतीति। अत्र अन्यः इति शब्दस्य न द्रष्टृभिन्नः इत्यर्थः। द्रष्टृभिन्नः (ज्ञातृभिन्नः) नोपदेशे समर्थः भवतीति प्रागेवोक्तं वर्तते। किन्तु आत्मद्रष्टा सर्वसामान्यजनविलक्षणः भवतीति अन्यशब्देन सामान्यजनविलक्षणः द्रष्टा इत्यर्थः विविक्षितः। परन्तु यः आत्मद्रष्टा सः समाहितचित्तः लाभपूजाख्यात्यादिप्रयोजनमनपेक्षमानः न सामान्यतः परेषामुपदेशे प्रवर्तते। करुणया (लोकोद्धरणाय) कदाचित् प्रवर्तते। तस्मात् करुणया आत्मस्वरूपोपदेष्टा यः भवति सः परमेश्वरवदत्यन्तदुर्लभ इति तादृशः लोककल्याणायोपदेष्टा आश्चर्यवद् भवतीति भावः।

अन्यः चैनमाश्चर्यवत् शृणोति। श्रवणं मनननिदिध्यासनपरिपाकद्वारा निर्विकल्पकसाक्षात्कारे अविद्यानाशके हेतुः भवति। आत्मसाक्षात्कारे विद्यमानमाश्चर्यवत्वं श्रवणक्रियायामुपचर्यते। अथवा मूलाज्ञाननाशकाखण्ड-साक्षात्कारं प्रति श्रवणस्य परंपराया कारणत्वाद् श्रवणक्रियापि आश्चर्यवद् भवति इत्यर्थः। योऽन्यः द्रष्टुः वक्तुश्च (मुक्तात्) विलक्षणः अर्थाद् मुमुक्षुः ब्रह्मविदं विधिवदुपसृत्य वेदान्तवाक्यतात्पर्यमवधारयितुं शृणोति। तादृशः श्रोता (श्रवणकर्ता) अनेकजन्मानुष्ठितसुकृतक्षालितमनोमलतया अतिदुर्लभः इति आश्चर्यवद् भवति। अत्र यो यः श्रवणादौ प्रवर्तते सः सर्वोपि आत्मानं वेत्तीति भ्रमः स्यात्। अतः भ्रमनिराकरणाय चतुर्थः पादः प्रोक्तः भगवता **"श्रुत्वाप्येनं वेद न चैव कश्चित्"** इति। श्रवणादिकं कुर्वन्नपि कश्चिदेव वेद (आत्मानं साक्षात्कर्तुं प्रभवति) न सर्वः इति भावः। अत एवोक्तं वार्तिके **"कुतस्तज्ज्ञानमिति चेत्तद्धि बन्धपरिक्षयादिति।।"** कुतः - कस्माद्धेतोः, तज्ज्ञानं-आत्मसाक्षात्कारः भवतीति अनुषज्यते। बन्धपरिक्षयशब्देन प्रारब्धकर्मणः नाशः विवक्षितः। अखण्डाकारवृत्तिं प्रति प्रारब्धक्षयः न साक्षात्कारणं भवति। किन्तु महावाक्येन निर्विकल्पकसाक्षात्कारे जननीये प्रारब्धनाशः सहकारिकारणं भवति। तस्मात् श्रवणे श्रवणादौ वा प्रवृत्तानां पूर्वोक्तसाधनचतुष्टयसंपन्नानां सर्वेषामस्मिन्नेव जन्मनि आत्मसाक्षात्कारः न भवति, किन्तु येषां प्रारब्धक्षयरूपसहकारिकारणमपि वर्तते तेषामेव तथा भवति। अन्येषां तु तादृशसहकारिकारणस्य यदा संपत्तिः अस्मिन् जन्मनि जन्मान्तरे वा तदैव साक्षात्कारः संपद्यते इति भावः। उक्तञ्च भगवता-

**"मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चित्मां वेत्ति तत्वतः।।"** इति (गीता 7/3)

अत्र वेत्तीति क्रियापदे वेदनं धात्वर्थः। वेदनञ्च आत्मसाक्षात्कारः एवात्र विवक्षितः इति प्रकृते क्रियायां तथा वेत्तरि कर्तरि (अर्थात् द्रष्टरि) आश्चर्यवत्वविशेषणं "आश्चर्यवत्पश्यति" इत्यत्र वर्णितमेव ग्राह्यम्। एवं कर्मणि विषये चाश्चर्यवत्वं प्रागुक्तमनुवर्तते इति अत्रापि त्रिषु पदार्थेषु आश्चर्यवत्वविशेषणस्य समन्वयः द्रष्टव्यः।

तस्मादीदृशस्य परमदुर्विज्ञेयस्य अनेकजन्मानुष्ठितसुकर्मादिपरंपराभिः अधिगन्तव्यस्य आत्मनः स्वरूपं त्वं त्वया लक्ष्यमानविवेकिनः वा कथमनायासेन अवगन्तुं प्रभवन्तीति परमार्थः। अतः अर्जुनेन निर्दिष्टानां अपेक्षितविवेकज्ञानं नास्तीत्यतः हेतोः तेषामपि दुःखं भवत्येवेति भावः अत्र विविक्षितः। विशेषार्थप्रतिपादनम्। यद्यपि **"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"** (तैत्तिरीयोपनिषद् – 2) इति श्रुतिबलाद् ज्ञायते शुद्धः आत्मा (परब्रह्म) कस्यापि शब्दस्य वाच्यः न भवतीति। तथापि तत्त्वमस्यादि महावाक्यघटकतत्पदेन विशिष्टशक्तेन (तत्पदं सर्वज्ञत्वादिविशिष्टेश्वरे शक्तं भवति।) जहदजहत्स्वार्थलक्षणया

शक्यतावच्छेदकविनिर्मोकेण शुद्धचैतन्यस्वरूप-मात्रोपस्थितिः जायते। ततः शब्दादपि अपरोक्षं ज्ञानं भवतीति वेदान्तिनां वादः प्रसिद्धः इति महावाक्येनैव पूर्वोक्तोपस्थितिसहकृतेन चैतन्यस्वरूपमात्रावगाहि निर्विकल्पक-साक्षात्कारः जायते। स एव अविद्याघातकः भवति। एतदनु श्रीमधुसूदन-सरस्वतीस्वामिपादाः पूर्वोक्तश्रुतिबलाद् महावाक्येन शक्तिं लक्षणां संबन्धान्तरञ्च विना शुद्धस्वरूपसाक्षात्कारः भवितुमर्हतीति विशेषप्रकारं वर्णयामासुः। तत्र दृष्टान्तः सुषुप्त्यवस्थायां मग्नस्य उत्थापकं वाक्यं भवति। यथा सुषुप्तः स्वस्य उत्थापकवाक्याद् शक्त्यादिवृत्या नार्थं अवगच्छति, किन्तु शब्देन स्वरूपमात्रं प्रबुद्ध्य उत्तिष्ठति तथा प्रकृतेऽपि महावाक्येन लक्षणाजन्योपस्थितिं विना अखण्डसाक्षात्कारः भवति।

तत्राक्षेपः। शक्त्यादि संबंधं विना शब्देन बोधजनने अस्य शब्दस्य अयमेव वाच्यार्थः अयं नेति व्यवस्था न स्यात्। एकेन शब्देन सर्वार्थबोधापत्तिः इति। तत्र समाधानम्- लक्षणास्वीकारेपि शक्यसंबन्धरूपायाः लक्षणायाः अनेकेषु सत्वात् अव्यवस्थादोषः (एकेन शब्देन लक्षणया सर्वार्थबोधापत्तिः दोषः) समानः। वक्तुः तात्पर्यं लक्षणापक्षे अव्यवस्थादोषवारकं भवतीत्यपि न उचितम्। यतः एकः श्रोता प्रकरणादिना एकस्मिन्नर्थे वक्तृतात्पर्यं अवधारयति, अन्यः अन्यस्मिन्नर्थे इति अव्यवस्था वर्तते एव। यदि कश्चिदेव पुरुषविशेषः (श्रोता) तात्पर्यं अवधारयति न सर्वः पुमानिति चेत् तदा पुरुषगतः (श्रोतृगतः) निर्दोषत्वरूपः गुणः एव लक्षणापक्षे नियामकः (अव्यवस्थादोषपरिहारकः) इति वाच्यम्। अत्रापि महावाक्यश्रोतरि निर्गतनिखिलमलत्वं नितान्तविशुद्धस्वान्तत्वं वा विशेषगुणः नियामकः अक्षतः इति विनापि पदार्थसंबन्धं अखण्डसाक्षात्कारं प्राप्स्यतीति कानुपपत्तिः। अत एवोक्तं तैरेव मङ्गलश्लोकेषु **"साक्षात्कारो निर्विकल्पः शब्दादेवोपजायते"** इति। शुद्धस्य शब्दवृत्तिविषयत्वस्वीकारे लक्षणापक्षे श्रुतिविरोधदोषः प्रसज्यते। एतेषां पक्षे तु श्रुत्यनुग्रहः एवेति श्रीमधुसूदनसरस्वतीस्वामिपादानां पक्षः एव श्रेयान् भाति।

**नश्यत्यविद्यया सार्धं हत्वा रोगमिवौषधम्।।"** (बृहदारण्यकोपनिषत् श्रीशाङ्करभाष्यविवरणभूतं वार्तिकम्।)

**वार्तिकार्थविवरणम्-** विद्वांस्तं मोहहानतः इति। विद्वः इत्यत्र धात्वर्थः वेदनं - अखण्डाकारवृत्तिः। तं - स्वप्रकाशचैतन्यं, द्वितीयार्थः विषयत्वं, तस्य वेदनेऽन्वयः। मोहः- अविद्या, हानं-नाशः। मोहहानतः इति पञ्चमीस्थानापन्नतसिलः प्रयोजकत्वमर्थः। तथा च मूलाज्ञाननाशप्रयोजिकां शुद्धस्वरूपविषयकाखण्डाकार-वृत्तिं महावाक्येन प्राप्नुमः इत्यर्थः। अत्रैवं शङ्का भवति यत् यथा धूमाद् वह्निमान् पर्वतः इत्यत्र धूमनिष्ठं वह्निज्ञानप्रयोजकत्वमेव प्रतीयते तथाऽत्रापि तसिला प्रकृत्यर्थनिष्ठप्रयोजकत्वमेव बोधयितुं शक्यते न तु प्रकृत्यर्थनिरूपितं प्रयोजकत्वं, ततः वार्तिकेन विवक्षितार्थसिद्धिः न भवति, किन्तु विपरीतार्थः एव प्रतीयेत इति चेद् सत्यं मोहहानतः इत्यत्र न तसिल् किन्तु सार्वविभक्तिकः तसिः। तथा च मोहहानाय इत्यर्थे मोहहानतः इति प्रयुक्तम्। मोहहानाय इत्यत्र तुमर्थाच्च भाववचनादित्यनेन (अष्टाध्यायी 2/3/15) अनुशिष्टा चतुर्थी भवति। तत्सूत्रार्थः एवं वर्तते तुमुन्प्रत्ययसमानार्थकाद् भाववचनात् तुमुन्नर्थे चतुर्थी भवति इति। तेन यथा भोक्तुं व्रजतीति प्रयुज्यते तथा भोजनाय व्रजतीत्यपि प्रयोक्तुं शक्यते। तत्र चतुर्थ्याः प्रकृत्यर्थनिरूपितं प्रयोजकत्वमेवार्थः। ततः भोजनप्रयोजकं गमनमिति बोधः भवति। तादृशचतुर्थीस्थानापन्नतसेः अपि प्रकृत्यर्थनिरूपित-प्रयोजकत्वमेवार्थः। तथा च मोहहानप्रयोजकं वेदनं इति वार्तिकारैः विवक्षितः बोधः एव मोहहानतः विद्वः इत्यत्रापि भवतीति न कश्चिद् दोषः।

"अविद्याघातिनः शब्दाद्" इत्यत्र घातिनः इति शब्दस्य (महावाक्यस्य) विशेषणं भवति। तथाहि ज्ञानाज्ञानयोः परस्परं विरुद्धयोः एकदा एकत्रासंभवात् ब्रह्म न जानामीति प्रत्ययगोचरस्य भावरूपस्य अज्ञानस्य (मूलाविद्यायाः) अखण्डाकारवृत्युत्पत्तिकाले एव महावाक्येन नाशः जायते। तस्मादेव अविद्यानाशकाद् शब्दादित्युक्तम्। उपादानव्यतिरेकेणापि क्षणं वृत्तेः अवस्थानं नैयायिकानां मते यथा समवायिहेतुनाशाधीनस्य कार्यनाशस्य उत्पत्तिस्थले इव संभवति।

**वार्तिकार्थनिर्णये अनुपपत्तिप्रदर्शनम् - "याऽहं ब्रह्मेति धीः भवेत्। नश्यति अविद्यया सार्धं हत्वा रोगमिवौषधम् ।।"** इत्यत्र कश्चन विरोधः वर्तते। सार्धमित्यस्य सह इत्यर्थः। तथा च अहं ब्रह्मेति बुद्धिः मूलाविद्यया सह नश्यतीति बोधः अत्र विवक्षितः इति भाति। स चासङ्गतः। यतः यदि एकस्मिन्नेव क्षणे क्रियाद्वयं भवति तदा एव सहशब्दस्य प्रयोगः प्रामाणिकः वर्तते। यथा पुत्रेण सह गच्छति पिता इत्यत्र पुत्रस्य गमनक्षणे एव पितरि गमनक्रिया वर्तते। अत एव तथा प्रयुज्यते। एवं यदि विलम्बेन क्रिययोः उत्पत्तौ अपि तथा प्रयोगः स्यात् तदा पूर्वदिने घटः नष्टः द्वितीयदिने पटः नष्टः तत्रापि घटेन सह पटः नश्यतीति प्रयोगापत्तिः। प्रकृते अविद्यानाशस्य उत्पत्तेः अनन्तरक्षणे एव अखण्डाकारवृतिः नश्यति कारणनाशात् कार्यनाशः इति न्यायेन। नैकस्मिन् क्षणे उभयोः नाशः जायते। तस्मात् कथं वार्तिककारैः "नश्यति अविद्यया सार्धम्" इति प्रयुक्तम्।

**वार्तिकार्थनिर्णये अनुपपत्तिपरिहारः-** प्रथमतः अविद्यावृत्योः एकस्मिन् क्षणे नाशः संभवति वा इति विचारयामः। कस्मिन् क्षणे उभयोः नाशः विवक्षितः वृत्युत्पत्तिक्षणे वा तद्द्वितीयक्षणे वा। न प्रथमः । वृत्तिप्रभवक्षणे नैव वृत्तेः नाशः संभवति। तर्हि द्वितीयक्षणे एव उभयोः नाशः भवति इति चेन्न। तत्क्षणे वृत्तिनाशं प्रति पूर्वक्षणे कारणं किञ्चिद् वाच्यम् । न हि शब्दः (महावाक्यम्) नाशकः भवितुमर्हति। महावाक्यमेव वृत्तेः कारणं भवति। तस्माद् जनकः एव यदि नाशकः स्यात् तदा उत्पत्तिरेव न स्यात् । जनकत्वनाशकत्वयोः परस्परं विरुद्धत्वात्। तस्मात् सहभावस्य अन्यत्र एकक्षणोत्पत्तिकत्वेपि अत्रासंभवान्न तादृशसहभावः विवक्षितः, किन्तु समानकालः एव। यथा अतितीक्ष्णा इयं सूची एकक्षणे शतपत्रपत्रशतं भिनत्तीति प्रयुज्यते। न हि तीक्ष्णसूची एकक्षणे शतं पत्राणि भिनत्ति। किन्तु प्रथमक्षणे प्रथमपत्रं भित्वा ततः द्वितीयक्षणे द्वितीयं इति क्रमशः एव। यथा तत्र सूक्ष्मकालभेदं अनाकलय्य तथा प्रयुज्यते एवम् अत्रापि शब्देन वृत्या वा अविद्यानाशः प्रथमक्षणे जायते, ततः कारणनाशात् कार्यनाशः इति न्यायेन द्वितीयक्षणे वृत्तिनाशः भवति। अतः द्वयोः नाशयोः एकमात्रक्षणेन व्यवधानोत्पत्तौ अपि क्षणभेदं अपरिलक्ष्य "नश्यति अविद्यया सार्धं" इति प्रयुक्तम्। तदा एव हत्वा रोगमिवौषधमिति दृष्टान्तोपि सङ्गच्छते। यथा औषधं रोगं हत्वा (रोगनाशोत्तरकालं) नश्यति तथा वृत्तिरपि अविद्यां नाशयित्वा नश्यतीति भावः।

**अत्रैव द्वितीयं समाधानम्।** अथवा यथा परस्परविरुद्धज्ञानयोः क्षणमेकं सहावस्थानं नैयायिकाः संभवतीति स्वीकुर्वन्ति। तथाहि शङ्खः न पीतः इति प्रत्यक्षोत्पत्तिक्षणे एव यत्र शंखः पीतः इति प्रत्यक्षस्य सामग्री अपि उत्पन्ना तदा तत्र द्वितीयक्षणे विरुद्धयोः प्रत्यक्षयोः सहावस्थानमिव प्रकृते ज्ञानाज्ञानयोः वृत्युत्पत्तिक्षणे सहावस्थानं संभवति। तद्द्वितीयक्षणे वृत्या वृत्यविद्यायोः नाशः संभवति। अत एव ज्ञानं अज्ञानस्य नाशकमिति उद्धोषः संगच्छते। एतत्पक्षे वृत्तिनाशकः कः इति विचार्यते। अन्यस्य नाशकस्य विरहात् कार्यत्वेन नाशावश्यंभावात् वृत्तिनाशः वृत्तिजनकशब्दजन्यः शब्देतराजन्यत्वेसति जन्यत्वात् इत्यनुमानेन शब्दः एव तन्नाशकः इति अनुमीयते। न च जनकत्वनाशकत्वे विरुद्धे इति शङ्क्यम् । रूपभेदेन तयोरेकत्रसंभवात्। तथाहि शब्दनिष्ठवृत्तिनाशकता तन्निष्ठवृत्तिजनकतावकच्छेदकातिरिक्तधर्मावच्छिन्ना तद्विरुद्धत्वेन प्रतीयमाननिरूपितजनकतात्वादित्यनेन तयोः तत्र संसाधनं संभवति। शब्दनिष्ठमहावाक्यत्वं वृत्तिजनकतावच्छेकं, विशेषणतया वृत्युपहितशब्दत्वं वृत्तिनाशकतावच्छेदकं च भवति।

**तृतीयं समाधानम्** अथवा यथा नैयायिकमते अन्त्यशब्दः स्वयमेव स्वस्य नाशकः तथा अखण्डसाक्षात्कारोपि स्वमेव स्वस्य नाशकः भवति। तथास्वीकारे न कोपि दोषः प्रसज्यते। अस्मिन् तृतीयपक्षे कार्यकारणभावे लाघवमपि वर्तते। तथाहि दृश्यत्वावच्छिन्ननाशं प्रति अखण्डसाक्षात्कारः कारणमिति एकः एव कार्यकारणभावः कल्पयितुं शक्यते। पूर्वमते न तथा। इदानीं अविद्याघातिनः इत्यस्य स्वजन्यवृत्तिद्वारा अविद्यानाशकादित्यर्थः वक्तव्यः इति सर्वं सूपपन्नम्।

**उपसंहारः-** मोक्षोपायप्रतिपादनाय प्रवृत्तेषु शास्त्रेषु मध्ये वेदान्तेन प्रतिपाद्यः मार्गः सर्वोत्कृष्टः इति विपश्चिताम् अभिप्रायः। स्वरूपानान्दप्राप्तिरेव मोक्षः, तत्र महावाक्यजन्याखण्डसाक्षात्कारः हेतुरिति वेदान्तसिद्धान्तः। महावाक्येन लक्षणया चरमसाक्षात्कारः जायते इति एकः पक्षः, तन्निरपेक्षेण शब्दादेव तज्जायते इति अन्यः पक्षः। श्रीमद्भगवद्गीतायाः गूढार्थदीपिकाकाराः श्रीमधुसूदनसरस्वतीस्वामिपादाः द्वितीयं पक्षं वार्तिकसाहाय्येन द्वितीयाध्याये स्थापयामासुः । तमेवांशं अस्मिन् प्रबन्धे सयुक्तिकं अहं वर्णितवान्। इति शम्। सर्वं श्रीसाम्बशिवार्पणमस्तु

**- प्रबन्धनिर्माणार्थं परामृष्टानां ग्रन्थानां सूची -**

1. श्रीमद्भगवद्गीता

2. श्रीमद्भगवद्गीताशाङ्करभाष्यम् ।

3. तैत्तरीयोपनिषद् ।

4बृहदारण्यकोपनिषद्भाष्यवार्तिकम्।

5 श्रीमधुसूदनसरस्वतीस्वामिपादानां गूढार्थदीपिका।

6 श्रीधर्मदत्तझाशर्मणां गूढार्थतत्वालोकः (गूढार्थदीपिका व्याख्या)।

7. न्यायसिद्धान्तमुक्तावली

8. वैयाकरणसिद्धान्तकौमुदी ।

**वरिष्ठसहायकाचार्यः (न्यायदर्शनविभागः) राष्ट्रियसंस्कृतसंस्थानम्, श्रीरघुनाथकीर्तिपरिसरः.देवप्रयागः, उत्तराखण्डः**

# संस्कृताप्लाविता नूनं दिव्या भारतसंस्कृतिः

✍प्रो. हंसधर झाः

नात्र सन्देहो यत् संस्कृतं भारतीयसंस्कृतेः जीवनमस्ति। संस्कृतभाषा जगतः समस्तानामपि भाषाणां पोषिकाऽस्ति। निजाश्चर्यकरवैज्ञानिकव्याकरणकारणादेव संस्कृतं प्रति भाषाशास्त्रिणां हृदि अनुपमा श्रद्धा दरीदृश्यते।

आङ्लभाषा, या खलु अद्यत्वे अस्मद्देशे आधारहीनं स्वामित्वं भजते, तां यदि संस्कृतरहितां कुर्यात्तदा सा पङ्गुत्वमवाप्स्यतीत्यत्र न सन्देहलेशः। भाषा सा भवति यत्र वर्णशब्दयोर्मध्येऽथवा शब्दवाक्ययोर्मध्ये कश्चन वैज्ञानिकः सम्बन्धो भवति। जलवायुप्रभावाज्जनानामुच्चारणे वैभिन्यं भवितुमर्हति, शब्दस्य वास्तविकं स्वरूपं क्लिष्टतावशात् परिवर्तते, नूतनभाषाया निर्माणं भवति, परन्तूद्गमश्रोतेन येन केनापि प्रकारेण प्रायः शब्दस्य सम्बन्धः परिलक्षितो भवत्येव। यथा पुत्रीं दृष्ट्वा मातुरथवा मातरं दृष्ट्वा पुत्र्याः बोधो जायते। तथैव रूपान्तरितशब्द-मूलशब्दयोः सम्बन्धः स्वतः परिलक्ष्यते। यथा संस्कृतस्य पुरोजरा शब्दोऽस्ति, अस्यार्थो भवति समयात् पूर्वं वार्द्धक्यप्राप्तिः। आङ्लभाषायां स एव शब्दः 'परोजेरिया' इतिरूपे परिवर्तितो जातः। मनुशब्दात् मैन, भूगोलशब्दात् ग्लोब, सूनुशब्दात् सन्, दन्तशब्दात् डैन्ट, इत्यादिशब्दाः परिवर्तिता जाताः। एतेषां दर्शनमात्रेण उभयोः सम्बन्धः स्पष्टं परिलक्ष्यते।

संस्कृतभाषा व्याकरणनियमैस्तथा सुघटिताऽस्ति येन आदिकालादिदानीं पर्यन्तमत्र विकृतेः प्रवेषो नैव जातः, नैव च भविष्यतीत्यपि सुनिश्चितमेव। एकैकस्य वर्णस्यार्थनिष्पादनमस्य वैशिष्ट्यमस्ति। संस्कृतव्याकरणे उणादिप्रकरणगतशब्दरचना, उपसर्गाणां प्रयोगेण धातूनामनेकार्थत्वप्रतिपादनम्, सर्वमप्यनल्पाश्चर्यकरमेव।

एवं वैशिष्ट्यनिचयपरिपूरितमिदं दिव्यं संस्कृतमस्माकं भारतीयसंस्कृतेरात्माऽस्ति। तथा दिव्यात्मवतीयं भारतीया संस्कृतिरपि दिव्याऽस्ति।

समग्रेऽपि संसारे सकलासु संस्कृतिषु भारतीया संस्कृतिः प्राचीनतमेति निर्विवादम्। संसारस्येतिहासे अनेकाः संस्कृतयः प्रादुर्भूता गौरवान्विताश्च जाताः, किन्तु निजविरुद्धाक्रमणान् सोढुमसमर्था अभवन्। रोमदेशस्य संस्कृतिः पाश्चात्यजगति कदाचिदतीव प्रभावशीलाऽऽसीत्। यूनानसंस्कृतेः मिश्रसंस्कृतेश्च कदाचित्परमौत्कर्ष्यमासीत्। परन्तु सम्प्रति तासां संस्कृतीनां कुत्रचिन्नामलेशोऽपि नाऽवाप्यते। किन्तु भारतीया संस्कृतिर्विविधानाक्रमणान्, विविधविकटपरिस्थितीश्च सोढ्वाऽपि निरन्तरमग्रे गम्यमानेति प्रत्यक्षमेव। सुनियोजितषड्यन्त्रद्वारा विधर्मिभिर्विदेशिशासकैः विगतैरनेकैश्शतकैर्भारतीयसंस्कृतेरुन्मूलनस्य प्रयासो विहितः, तथेदानीमपि तत्षड्यन्त्रप्रयोगः क्रमबद्धयोजनया प्रचलत्येव। अनार्यैः संस्कृतग्रन्था यावच्छक्यं होलिकादहनमिव भस्मीकृताः। एवं यदा बहुविधप्रयासास्तेषामसफला एव जातास्तदा नूतनप्रयोगेण सहेदानीमपि प्रयासरताः सन्त्येव केचित्। तद् यथा, "वेदः पशुचारकाणां भाषा विद्यते" (वेद गरडियों की भाषा है), 'संस्कृतं मृता भाषाऽस्ति' इत्यादिविषयकः प्रचारः। कस्यापि देशस्यास्तित्वनाशाय प्रबलतम उपायो भवति तस्य देशस्य संस्कृतिनाशनम्। तथा एवमेव प्रयासो विहितो भारतं प्रति। भारतीयसिद्धान्तोन्मूलनस्य यावच्छक्यं प्रयासो विहितः। तक्षशिला-नालन्दा-मगध-उज्जैन-काशी-कश्मीरादिविश्वविश्रुतानां विश्वविद्यालयानां ग्रन्थभाण्डाराणि, यत्र लक्षचतुष्टयादप्यधिका ग्रन्था आसन्, विदेशिभिराक्रमकारिभिर्भस्मीकृतानि। तथाप्यस्माकं संस्कृतिस्तप्तस्वर्णमिव दीप्तिमती सती संसारस्योत्थानपतने अवलोकयन्ती साक्षिरूपेण विद्यमानाऽस्ति। परन्त्विदमपि सत्यं

 ISSN – 2349-3100

यत्पाश्चात्यप्रबलवायुप्रभावेण प्रभाविता दृश्यन्ते आधुनिका भारतीया युवानः। तेभ्यः स्वकीया सभ्यता, संस्कृतिर्भाषा च सर्वा अपि दोषपूर्णा अविकसिता अपूर्णाश्च प्रतीयन्ते। अद्य पाश्चात्यवेशभूषायास्तद्भाषायाश्चान्तःप्रवेशोऽवलोक्यतेऽत्र भारते। सूर्योदयस्योपासका अद्य पश्चिमोपासनया लाभान्विता भवितुमिच्छन्ति। वस्तुत एतत् सर्वमप्यस्माकं कृते कष्टकरमेव न तु सुखकरम्।

तथापीदमपि सत्यमेव यदस्माकं संस्कृतेर्मूलं तथा गभीरमस्ति यस्योन्मूलनमसम्भवमेव। कैश्चिद्विशिष्टैरन्तःगुणैरेव भारतमादिकालादेव जगद्गुरुत्वमावहति। भारतेन संसाराय प्रत्येकं दिक्षु किमपि प्रदत्तमेव। अद्यापि तत्त्वज्ञानाय भारतस्य वीथिषु पाश्चात्या अटन्तोऽवलोक्यन्ते। तस्य च तत्त्वज्ञानस्य साक्षात्सम्बन्धोऽस्ति संस्कृतेन सह।

जगत्यस्मिन् संस्कृतमतिरिच्य निखिला अपि भाषा मानवकृतास्सन्ति, संस्कृतषा देवभाषेति गीयते। भारतीयसंस्कृतेर्मूलम् वेदोऽस्ति, तथा वेदो हि देवभाषोपनिबद्धोऽस्ति। संस्कृतभाषायाः प्रचीनग्रन्थेषु यानि महत्त्वपूर्णतत्वानि प्राप्यन्ते न तथाऽन्यग्रन्थेषु। संस्कृतं न केवलं भारतीयभाषाणामेव, अपितु विश्वस्य समस्तानामपि भाषाणामात्माऽस्ति। यस्याः कस्याश्चिदपि भाषातः संस्कृतं यदि पृथक् कुर्यात् तदा सा भाषा पङ्ग्वी भवितुमर्हति। संस्कृतरहिताया भाषायास्तु अस्तित्वमेव नश्यति। यथाऽवलोक्यतां तावदाङ्ग्लभाषा एव। सेन्टर(cener)शब्दः केन्द्रशब्दस्य विकृतं रूपमस्ति। अत्र केन्द्रशब्दस्य ककारस्थाने सी-वर्णस्य प्रयोगो जातस्तेन सेन्द्रः निष्पन्नः। तत्रापि संयुक्ताक्षरस्योच्चारणे काठिन्यात् न्द्र इतिस्थाने दर इति प्रयोगो जातस्तथा पुनः दर इत्यत्र दकारस्थाने टकारस्य प्रयोगो जातः। एवं केन्द्रशब्दस्यापभ्रंशः सेन्टरशब्दो जातः। एवमेवाङ्ग्लभाषायां म्युनिसिपलकमेटी इतिशब्दो विद्यते। आङ्ग्लीया अस्य शब्दस्यार्थं नैव कर्तुं शक्नुवन्ति, किन्तु संस्कृतज्ञः अस्य शब्दस्य अर्थं सहजतया वक्तुं पारयति। अयं शब्दः संस्कृतशब्दस्य मनुष्यपालसमितिः इत्यस्य अपभ्रंशोऽस्ति। एवं भूतान्यनेकान्युदाहरणानि सन्ति यद्दर्शनमात्रेण स्पष्टमवगम्यते यत् कः मूलशब्दः, कश्चापभ्रंशशब्दः। संस्कृतज्ञाः आङ्लशब्दानाम् अर्थं व्युत्पत्तिं वा संस्कृतभाषामाध्यमेन सहजतया कर्तुं शक्नुवन्ति। यतस्ते शब्दा मूलतः संस्कृतस्यैव सन्ति तथा तेषामपभंशरूपाणामेव पाश्चात्या अधिकारिणः सन्ति। अत्रोदाहरणरूपेण केचन अपरे शब्दा अपि अवलोक्यन्ताम्। तान् दृष्ट्वा स्वयमेव निर्णयं कर्तुं प्रभविश्यन्ति भवन्तो यदिमे शब्दाः संस्कृतभाषातो निर्गताः सन्ति न वा? यथा-

| संस्कृतशब्दाः | **आङ्ग्लशब्दाः** | संस्कृतशब्दाः | **आङ्ग्लशब्दाः** |
|---|---|---|---|
| अन्तरिम | Interim | अन्तर्गति | Integrity |
| अन्तर्दर्शन | Introductiom | माध्यम | Medium |
| ओषजन | Oxygen | आचार्य | Incharge |
| स्थायीबल | Stable | बली | Able |
| बलिष्ठ | Blessed | युवाङ्ग | Young |
| नाम | Name | सम | Same |
| अन्तिम इत्थम | Ultimatum | वक्री | Back |
| कृत | Creat | मन | Mind |
| पथ | Path | द्वार | Door |
| पात्र | Pot | प्रीति | Pretty |

 ISSN – 2349-3100

| | | | |
|---|---|---|---|
| प्राप्ति | Profit | प्रयोजन | Provision |
| ऋष्यर्च | Research | मिश्रण | Mixture |
| ऊर्जा | Energy | भ्रू | Brow |
| नासा | Nose | दन्त | Dant |
| हृत् | Heart | पुरुषतत्वग्रन्थि | Prostat gland |
| मनुष्यकृत | Manuscript | मानव | Mane |
| सर्वोपरिमानव | Superman | श्री | Sir |
| अहम् | I am | यूयम् | You |
| अन्य | Any | क्रूर | Cruel |
| संशय | Suspence | त्रासदी | Tragedy |
| त्रिकोणमिति | Trignometery | व्यवहार | Behaviour |
| चरित्र | Character | कुलाचार | Culture |
| गम् | Go | अन्त | End |

एवम् आङ्ग्लभाषैव नहि, किञ्च विश्वस्य सर्वा अपि भाषा संस्कृतेनानुप्राणिताः सन्ति। एवंविशिष्टं दिव्यमिदं संस्कृतमस्माकं भारतीयसंस्कृतेरात्माऽस्ति। अतः दिव्यात्मवतीया भारतीया संस्कृतिर्दिव्याऽस्तीत्यत्र न सन्देहः। इदमेव कारणं यद्दिव्यसंस्कृतिवन्तो वयं भारतीया गौरवान्विता स्मः। अतो मुक्तकण्ठेन वक्तुं शक्नुमो वयम् -

**समस्तविश्वभाषाणां पोषिका देवगीरियम्।**
**जीवनं भारतीयायाः संस्कृतेः खलु संस्कृतम्।।** इति।

एवं नात्र सन्देहो यत् - "संस्कृताप्लाविता नूनं दिव्या भारतसंस्कृतिः" इति।।

## सङ्केतः -

**आचार्यः,ज्योतिषविभागः, राष्ट्रियसंस्कृतसंस्थानम्,मानितविश्वविद्यालयः, भोपालपरिसरः, भोपालम्।**

# चरखण्डानयनविधिः

✍ विजयानन्दः अडिगः बि.

साक्षनिरक्षसूर्योदययोरन्तरकालः एव चरकालः इत्युच्यते। अथवा चरति इति चरः, चरति=गच्छति=वर्धते उत्तरगोले दिनप्रमाणम् , दक्षिणगोले रात्रिप्रमाणं च इति चरः। अर्थात् येन कालखण्डेन उत्तरगोले दिनप्रमाणं दक्षिणगोले रात्रिप्रमाणं च वर्धते सः कालः एव चरकालः इत्युच्यते। अस्य उपयोगः तावत् प्रमुखतया ग्रहदिनरात्रिप्रमाणानयने याम्योत्तरदेशान्तरसंस्कारे अभीष्टदेशीयलग्नमानानयने च विद्यते। अयं चरः अथवा चरकालः कथमानेतव्यः इति चेत् उक्तं हि सूर्यसिद्धान्ते[1] –

**क्रान्तेः क्रमोत्क्रमज्ये द्वे कृत्वा तत्रोत्क्रमज्यया। हीना त्रिज्या दिनव्यासदलं तद्दक्षिणोत्तरम्॥**
**क्रान्तिज्या विषुवद्भाघ्नी क्षितिज्या द्वादशोद्धृता। त्रिज्यागुणाहोरात्रार्धकर्णाप्ता चरजासवः॥**
**तत्कार्मुकम् ......................... ।**

इति। अनेन क्रमेण चरसाधनं कर्तव्यं चेत् महत्याः गणितपरम्परायाः एव आवश्यकता भवति। अतः सिद्धान्तशिरोमणिकेतकीग्रहगणितादिग्रन्थेषु लघुना उपायेन चरखण्डेभ्यः चरकालसाधनक्रमः अभिहितः। तानि च चरखण्डानि मेषादिराशित्रयस्य क्रमेण – १०, ८ , ३ $\frac{१}{३}$ सन्ति। तदेतदुक्तं सिद्धान्तशिरोमणौ [2] – **तानि स्वदेशे चरखण्डकानि दिङ्नागस्त्र्यंशगुणैर्विनिघ्नी** इति। एवमेव केतकीग्रहगणिते[3] अपि - **त्रिष्ठा हता स्युर्दशभिर्भुजङ्गैर्दिग्भिश्चरार्धेन गुणोद्धृतान्त्या**[4] इत्यभिहितम्। इदानीम् एतानि चरखण्डानि [ १०, ८ , $\frac{१०}{३}$ ] कथमानीतानि इत्यत्र विचारः क्रियते।

एकाङ्गुलपलभादेशे एकद्वित्रिराशीनां चरासूनानीय तान् षड्भिः विभज्य अधोऽधः क्रमशः विशोध्यते चेत् एतानि चरखण्डानि लभ्यन्ते। एतदुक्तं भास्कराचार्यैः शिरोमणौ वासनाभाष्ये[5] – **एकमङ्गुलं पलभां प्रकल्प्य एकद्वित्रिराशीनां पृथक् चराण्यानीय तानि षड्भिर्विभज्य पानीयपलात्मकानि कृत्वा यावदधोऽधो विशोध्यन्ते तावद्दिङ्नागसत्र्यंशगुणाः उत्पद्यन्ते** इति।

इदानीम् अस्य गणितविधिं पश्यामः। एकस्य राशेः राशिद्वयस्य राशित्रयस्य च चरानयनाय तत्तत्क्रान्तिज्याः क्रान्तिकोटिज्याश्च अपेक्षिताः, अतः आदौ तत्साध्यते –

एकराशिज्या = ३०° अंशानां ज्या = १७१९

राशिद्वयस्य = ६०° अंशानां ज्या = २९७८

राशित्रयस्य = ९०° अंशानां ज्या = ३४३८

एकस्य राशेः क्रान्तिज्या[6] $= \frac{१७१९\times१३९७}{३४३८}$ = ६९८.५ ।

राशिद्वयस्य क्रान्तिज्या $= \frac{२९७८\times१३९७}{३४३८}$ = १२१०.०८ ।

राशित्रयस्य क्रान्तिज्या $= \frac{३४३८\times१३९७}{३४३८}$ = १३९७ ।

---

1 सूर्यसिद्धान्तः – अ.२, श्लो.६०-६१ पृ.सं.९०
2 सिद्धान्तशिरोमणिः – ग्रहगणिताध्याये अ.२,श्लो.५०, पृ.सं.६०
3 केतकीग्रहगणितम् – अ.२ श्लो. ७. पृ.सं.१०९
4 वस्तुतस्तु अयं ग्रहलाघवे विद्यमानः श्लोकः, केतकरवर्यैः स्वग्रन्थे स्वीकृतः।
5 सिद्धान्तशिरोमणिः – ग्रहगणिताध्याये अ.२,श्लो.५०, पृ.सं.६०
6 परमापक्रमज्या तु सप्तरन्ध्रगुणेन्दवः।
तद्गुणा ज्या त्रिजीवाप्ता तच्चापं क्रान्तिरुच्यते॥(सूर्यसिद्धान्तः- अ.२,श्लो.२८, पृ.सं.६२)

एतासां क्रान्तिज्यानां चापः क्रान्तिः भवति। तद्यथा [7] –

एकस्य राशेः क्रान्तिज्या = ६९८.५
(–) ६७१ ------------ तृतीयज्या
२७.५×२२५ / तृतीयचतुर्थज्ययोरन्तरम् ------ २१९ = २८.२५

३×२२५ = ६७५
(+) २८.२५
७०३.२५ -------- एकस्य राशेः क्रान्तिः

राशिद्वयस्य क्रान्तिज्या = १२१०.०८
(–) ११०५ ----------- पञ्चमी ज्या
१०५.०८×२२५ / पञ्चमषष्ठज्ययोरन्तरम् ------ २१० = ११२.५८

५×२२५ = ११२५
(+) ११५.५८
१२३७.५८ -------- राशिद्वयस्य क्रान्तिः

राशित्रयस्य क्रान्तिज्या = १३९७
(–) १३१५ ----------- षष्ठी ज्या
८२×२२५ / षष्ठसप्तमज्ययोरन्तरम् ------ २०५ = ९०

६×२२५ = १३५०
(+) ९०
१४४० -------- राशित्रयस्य क्रान्तिः

क्रान्तिकोटिज्यानयनम् –

क्रान्तेः कोट्यंशानां ज्या क्रान्तिकोटिज्या सैव द्युज्या इत्युच्यते। गणितसौकर्यार्थं नवतेः अंशानां कलाभ्यः क्रान्तिकलाः विशोध्य ताभ्यः क्रान्तिकोटिकलाभ्यः ज्याः साध्यन्ते [8] , तद्यथा –

५४००' --------- ९०° अंशानां कलाः (९०°×६०=५४००')
(–) ७०३.२५ --------- एकराशिक्रान्तिकलाः
४६९६.७५ --------- एकस्य राशेः क्रान्तिकोटिकलाः

२२५) ४६९६.७५ ( २० ----- गतज्या -- ३३२१ } अनयोः
४५०० २१ ----- गम्यज्या – ३३७२ }
अन्तरम् = ५१

---

[7] ज्यां प्रोज्झ्य शेषं तत्त्वाश्विहतं तद्विवरोद्धृतम्।
संख्यातत्त्वाश्विसंवर्गे संयोज्य धनुरुच्यते॥ (सूर्यसिद्धान्तः- अ.२,श्लो.३३, पृ.सं.६६)

[8] लिप्तास्तत्त्वयमैर्भक्ता लब्धं ज्यापिण्डकं गतम्।
गतगम्यान्तराभ्यस्तं विभजेत्तत्त्वलोचनैः॥
तदवाप्तफलं योज्यं ज्यापिण्डे गतसंज्ञके।
स्यात्क्रमज्याविधिरयम्................................॥ (सूर्यसिद्धान्तः – अ.२, श्लो.३१-३२, पृ.सं. ६५)

 ISSN – 2349-3100

$$\frac{१९६.७५\times५१}{२२५} = ४४.५९$$

३३२१ ------ गतज्या
(+) ४४.५९
३३६५.५९ ----- एकस्य राशेः क्रान्तिकोटिज्या (एकराशिद्युज्या)

५४००'
(–) १२३७.५८ --------- राशिद्वयस्य क्रान्तिकलाः
४१६२.४२ --------- राशिद्वयस्य क्रान्तिकोटिकलाः

२२५) ४१६२.४२ ( १८ ----- गतज्या -- ३१७७ } अनयोः
४०५० १९ ----- गम्यज्या – ३२५६ }
अन्तरम् = ७९
११२.४२

$$\frac{११२.४२\times७९}{२२५} = ३९.४७$$

३१७७ ------ गतज्या
(+) ३९.४७
३२१६.४७ ----- राशिद्वयस्य क्रान्तिकोटिज्या (राशिद्वयद्युज्या)

५४००'
(–) १४४० --------- राशित्रयस्य क्रान्तिकलाः
३९६० --------- राशित्रयस्य क्रान्तिकोटिकलाः

२२५) ३९६० ( १७ ----- गतज्या -- ३०८४ } अनयोः
३८२५ १८ ----- गम्यज्या – ३१७७ }
अन्तरम् = ९३

$$\frac{१३५\times९३}{२२५} = ५५.८$$

३०८४ ------ गतज्या
(+) ५५.८
३१३९.८ ----- राशित्रयस्य क्रान्तिकोटिज्या (राशित्रयद्युज्या)

 ISSN – 2349-3100

कुज्याचरज्ययोरानयनम् [9] –

एकाङ्गुलमितपलभादेशे कुज्याचरज्ये आनीये। अतः यथोक्तविधिना –

$\frac{६९८.५\times१}{१२}$ = ५८.२०८ ----- एकस्य राशेः कुज्या

$\frac{५८.२०८\times३४३८}{३३६५.५९}$ = ५९.४६ ----- एकस्य राशेः चरज्या

$\frac{१२१०.०८\times१}{१२}$ = १००.८४ ----- राशिद्वयस्य कुज्या

$\frac{१००.८४\times३४३८}{३२१६.४७}$ = १०७.७८ ----- राशिद्वयस्य चरज्या

$\frac{१३९७\times१}{१२}$ = ११६.४१६ ----- राशित्रयस्य कुज्या

$\frac{११६.४१६\times३४३८}{३१३९.८}$ = १२७.४७ ----- राशित्रयस्य चरज्या

एवं गणितं कृत्वा लब्धानां चरज्यानां चापः कर्तव्यः, २२५' कलापर्यन्तं ज्याचापयोः अन्तराभावात् ताः ज्याः एव एकद्वित्रिराशीनां चापाः भवन्ति। ते एव चरासवः इत्युच्यन्ते, ते च असवः षड्भिः भक्ताः विघट्यः भवन्ति [10] । अतः –

५९.४६ ÷ ६ = ९.९१ ----------- एकस्य राशेः चरविघट्यः

१०७.७८ ÷ ६ = १७.९६३ ---------- राशिद्वयस्य चरविघट्यः

१२७.४७ ÷ ६ = २१.२४५ ---------- राशित्रयस्य चरविघट्यः

एताः व्युत्क्रमेण अधोऽधः विशोध्यन्ते चेत् प्रत्येकं राशेः चरविघट्यः लभ्यन्ते। ताः एव चरखण्डानि इत्युच्यन्ते। तानि यथा –

२१.२५ – १७.९६ = ३.२९ --------- तृतीयराशेः चरखण्डम्

१७.९६ – ९.९१ = ८.०५ --------- द्वितीयराशेः चरखण्डम्

---

[9] क्रान्तिज्या विषुवद्भाघ्नी क्षितिज्या द्वादशोद्धृता।
त्रिज्यागुणाहोरात्रार्धकर्णाप्ता चरजासवः॥
तत्कार्मुकम् ..................................। (सूर्यसिद्धान्तः– अ.२.श्लो. ६१,पृ.सं.९०)

[10] षड्भिः प्राणैर्विनाडी स्यात्। (सूर्यसिद्धान्तः–अ.१,श्लो.११, पृ.सं.६)

 ISSN – 2349-3100

९.९१ एतदेव प्रथमराशेः चरखण्डम् ।

९.९१ इत्यत्र ०.९१ इत्यस्य अर्धाधिक्यात् १० इति ; ८.०५ इत्यत्र ०.०५ इत्यस्य अत्यल्पत्वात् त्यक्त्वा ८ इत्येव पूर्णाङ्कत्वेन स्वीक्रियते। ३.२९ इत्यत्र ३ इति पूर्णाङ्कः, ०.२९ इत्यस्य भिन्नराशौ परिणमनं क्रियते चेत् स्वल्पान्तरत्वात् $\frac{१}{३}$ इति अवयवः च लभ्यते। अतः एकाङ्गुलपलभादेशे मेषादिराशित्रितयस्य चरखण्डानि – १०, ८ , ३$\frac{१}{३}$ इति लभ्यन्ते। यदि एकङ्गुलपलभादेशे एतावन्मितानि चरखण्डानि तर्हि अभीष्टपलभादेशे कियन्मितानि ? इति त्रैराशिकेन अभीष्टदेशे चरखण्डानि साधितुं शक्यानि। गणिते लाघवत्वसम्पादनार्थमेव एतादृशं गणितकर्म अस्मत्पूर्वाचार्यैः अभिहितमित्यत्र नास्ति सन्देहः।

| राशिः | ज्या | क्रान्तिज्या | क्रान्तिः | द्युज्या | कुज्या | चरज्या | **चरासुः** | **चरविघटी** | **चरखण्डम्** |
|---|---|---|---|---|---|---|---|---|---|
| १ | १७१९ | ६९८.५ | ७०३.२५ | ३३६५.५९ | ५८.२०८३ | ५९.४६ | **५९.४६** | **९ .९१** | **१०** |
| २ | २९७८ | १२१०.०८ | १२३७.५८ | ३२१६.४७ | १००.८४ | १०७.७८ | **१०७.७८** | **१७.९६** | **८** |
| ३ | ३४३८ | १३९७ | १४४० | ३१३९.८ | ११६.४१६ | १२७.४७ | **१२७.४७** | **२१.२५** | $\frac{१}{३}$ |

<u>परिशीलितग्रन्थाः</u>

१. सूर्यसिद्धान्तः (तत्वामृतव्याख्योपेतः) – चौखम्भा संस्कृत भवन , वाराणसी – २००६ ।

२. सिद्धान्तशिरोमणिः (वासनाभाष्यसहितः) – चौखम्भा संस्कृत संस्थान , वाराणसी – २००५ ।

३. केतकीग्रहगणितम् (केतकीपरिमलोपेतम्) – भारतीय विद्या प्रकाशन , वाराणसी – २००१ ।

**ज्योतिषविभागः, राष्ट्रियसंस्कृतसंस्थानम् गुरुवायूरु परिसरःपुरनाट्टुकरा,केरलाः।**

 ISSN – 2349-3100

# संस्कृतमहिमा गरीयसी

✍ डॉ . मोहिनी अरोरा

भाति इति ”भा“, भायां रतं भारतम्। सा च ”भा“ संस्कृतमेव। सम् + कृ +क्त इति संस्कृतशब्दस्य व्युत्पत्तिः।[1]भाषेयं सर्वाभ्यो भाषाभ्यः प्रकारे विस्तारे च महती, लालित्ये विचारसौन्दर्ये चापि न न्यूना कुत्रापि। संस्कृतस्य महाद्युतिः आदिकालादेव समग्रं विश्वं देदीप्यमानं कुर्वन्ती अस्ति। जातानि भारते विविधानि सामाजिकपरिवर्तनानि, वैदेशिकानामाक्रमणानि च परन्तु भाषेयं सर्वदा भारतस्य प्रतिष्ठां च वर्धयन्ती व्यवहारपथेSवर्त्तत इत्यत्र नास्ति संशयः। सत्यमेव कथितमस्ति प्रबन्धरत्नाकरे **यत्प्रभापटलोद्भासा भासतेऽद्यापि भारतम् । [2]दिव्यं तत् संस्कृतज्योतिरासंसारं प्रवर्तताम्।।** वस्तुतः भाषाभिः दीप्यते जगदिदम्, ऋते च अन्धकारमयम्। लोके व्यवहारनिर्वहणाय भाषैव भवति प्रकृष्टतमं साधनं। उक्तं च दण्डिनः-

**इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।** [3]

महाकवि दण्डिः प्राचीनैः ऋषिभिः अभिनन्दिताम् आदृताम् च संस्कृतभाषां प्रशंसति **”संस्कृत नाम दैवीवागन्वाख्याता महर्षिभिः”** [4] इति। संस्कृतभाषैव केवलं भाषाशब्देनापि पुरा व्यवह्रियते स्म। यथा प्राप्यते निरुक्ते- **भाषायामन्वध्यायञ्च।** [5] वस्तुतः लोकव्यवहृतभाषा एव भाषा। अतः पाणिनिना अपि भाषाशब्दः प्रयुक्तः। तद्यथा- **भाषायां सदवसश्रुवः[6], प्रथमायाश्च द्विवचने भाषायाम्** [7]इति। भाषारूपे संस्कृतशब्दस्य प्रयोगः बाल्मीकिरामायणे प्राप्यते। यथा -

**यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् । रावणं मन्यमाना मां सीता भीता भविष्यति।।**[8]

संस्कृतम् देववाणी अमरवाणी सुरभारती गीर्वाणगीरित्यादिभिर्नामभिः प्रशस्यते। विद्वांसः एव देवाः, विबुधैः प्रयुक्ता चेयं वाणी इति धिया देववाणी उच्यते। अर्थगाम्भीर्यभावसौन्दर्यादिगुणैः भाषेयं सर्वासां भाषाणामपेक्षया अधिकं माधुर्यं धत्ते। अत उक्तं केनचित्-

**अमृतं मधुरं सम्यक् संस्कृतं हि ततोऽधिकम् । देवभोग्यमिदं यस्माद् देवभाषेति कथ्यते।।**[9]

सृष्टिकाले च आदौ स्वयम्भुवा इयं वाक् एव विसृष्टा। गीर्वाणवाण्या अनया प्रप्रथमं जगदिदं प्रदीपितम्। यतोहि सर्वादौ अनया भाषया आलोकितः लोकः। मानवसंस्कृतेः इतिहासः अस्यां भाषायामेव संरक्षितो वर्तते। इहैव सभ्यसंसारस्य प्राचीनतमं साहित्यं दरीदृश्यते। अतः विश्वपटले परिष्कृतासु भाषासु संस्कृतभाषा एव प्राचीनतमा अवतिष्ठते। महाभारते प्रसंगेSस्मिन् भणितमस्ति -

**अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।**[10]

संस्कृतभाषा जनभाषारूपेण ग्रन्थभाषारूपेण च महिमामण्डिता आदृता च वर्तते। स्वस्य गौरवमयीं यात्रां कुर्वन्ती भाषारेषा अनुदिनं प्रगतिपथे अग्रेसरा दरीदृश्यते। साम्प्रतिके समये समग्रे संसारे सुविख्याता सुपूजिता सुन्दरा सुबोधा सुमञ्जुला समुज्वला संस्कृतसुरगिरा सुशंसिता सुशोभते। एषा भाषा न केवलं भाषा एव अपितु समग्रज्ञानविज्ञानसंधारिणी योगविद्याकलाशिल्पभिः परिपूर्णा निखिलं शास्त्रं वर्तते संस्कृतम्। यथा चोक्तम्-

**संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः। वेदतत्त्वार्थ संजुष्टं लोकाऽऽलोकरं शिवम्।।** [11]

संस्कृतं तु विविधशास्त्राणामाकरमस्त्येव। धर्मार्थकाममोक्षाख्यान् पुरुषार्थान् लक्ष्यीकृत्य प्रवृत्तमस्ति अस्य साहित्यम्। संस्कृतस्य एकैकस्मिन् ग्रन्थे ज्ञानस्य बाहुल्यं वैविध्यञ्च दृश्यते। अत एव सर्वाङ्गसम्पूर्णास्ति इयं भाषा। यथा महाभारतस्य इयं गर्वोक्तिः सर्वथा चरितार्थतां भजन्तीरस्ति-

**धर्मे च अर्थे च कामे च मोक्षे च भरतर्षभ। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।**[12]

भरतमुनिना च नाट्यशास्त्रे निगदितम्-

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला। नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।**[13]

नाट्यशास्त्रस्य कथनमिदं सार्थकमेव दृश्यते। वस्तुतः समग्रस्य लोकस्य कर्माणि सम्यग्रूपेण संग्रहं कृत्वा अभि समक्षं प्रापयति इति अभिनयः, स च नाट्यधर्मितामाश्रित्य गीतवाद्याहार्यादिभिः संजुष्टः नाट्यसंज्ञामाप्नोति। उक्तं च-

**योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः । सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते।।**[14]

यथोच्यते साहित्यं समाजस्य दर्पणं भवति तथा अखिलस्य भारतस्य जीवनपद्धतेः दर्शनं नाट्यशास्त्रे कर्तुं शक्यते। एतादृशी लोकोपदेष्ट्री कृतिः कालजयी भवति। ईसातः सम्भवतः पञ्चसहस्रवर्षेभ्यः प्रागेव आलोके आगतं नाट्यशास्त्रम् आधुनिके कालेऽपि अत्यन्तं महत्वपूर्णं वर्तते। इदानीं पर्यन्तमपि नाट्यशास्त्रस्य विकल्पं निखिले भूमण्डले कुत्रापि द्रष्टुं न पार्यते। नाट्यवेदस्य स्रष्टा ब्रह्मणा एव उद्घोषितमासीत् यदहमेतादृशं नाट्यशास्त्रं स्रक्ष्ये यत् सार्वकालिकं सार्वभौमिकञ्च भविष्यति। यथोपभ्यते-

**धर्म्यमर्थ्यं यशस्यञ्च सोपदेश्यं ससंग्रहम् । भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम्।।**[15]

वर्तमानयुगेऽपि नाट्यशास्त्रस्य सम्माननं समग्रे विश्वे क्रियते। वैदेशिकाः एव प्रप्रथमं महता परिश्रमेण विलुप्तस्य नाट्यशास्त्रस्य अन्वेषणं कृत्वा प्रकाशनं कारितवन्तः। तेषु फेड्रिक हाल महोदयः (1865 ईसवी मध्ये), ग्रोसे महोदयः, रेग्नो महोदयश्च प्रमुखाः सन्ति। एवं प्रकारेणैव भारतस्य अनेके संस्कृतग्रन्थाः यथा श्रीमद्भगवद्गीता, पञ्चतन्त्रम्, कौटिल्यस्य अर्थशास्त्रम्, अभिज्ञानशाकुन्तलम् आयुर्वेदश्च स्वस्वक्षेत्रे विश्वस्य नेतृत्वं कुर्वाणः लोकप्रियाः पथप्रदर्शकाश्च सन्ति। प्रख्यातरचनाकारैः जीवनस्य प्रत्येकस्मिन् पक्षे उत्कृष्टाभिः रचनाभिः भारतीयसंस्कृतेः संरक्षणं विहितमस्ति अत एवोच्यते-

**ययैवादौ वेदाः परिकलितभेदाः प्रकटिताः स्मृतीनां धात्री या प्रसवनकरी योपनिषदाम्।**
**समस्तत्रैलोक्ये ह्युपदिशति याऽऽध्यात्मिकपथं स्फुरद्दिव्यज्योतिर्जगति जयतान्निर्जरगिरा।।**[16]

संस्कृते संस्कृतिस्तथा संस्कृते सकलाकलाः समाहिताः सन्ति। अपि च संस्कृते सकलं ज्ञानं तदा संस्कृते किन्न वर्तते। इत्थमियं विश्ववन्दनीया वाणी विविधेषु क्षेत्रेषु गौरवभूता स्थिता अस्ति। प्राचीनकाले इयं न केवलं बुधजनवाणीरूपेण गौरवान्विता भाषा आसीत् प्रत्युत जनसामान्ये अपि व्यवहारास्पदमभूत्। वैदिककाले तु इयं भाषा जनवाणीरूपेण वर्णिता दृश्यते। तदानीन्तने समये एषा जनकल्याणकारिणी व्यवहारभाषा आसीत्। यथा दृश्यते यजुर्वेदे-**यथेमां वाचं कल्याणीमवदानि जनेभ्यः। ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय।।**[17]

अस्मिन् सन्दर्भे उदाहरणार्थं सूतस्य वैयाकरणस्य च संवादः द्रष्टव्यः अस्ति। यथा आचार्य मधुसूदनशास्त्रिणा वर्णितम् -**“सूत माने सारथी है, जो शूद्र है। शूद्र भी पढ़ते थे। वैयाकरण ने पूछा रथ का प्रवेता सारथी कौन है। सूत ने उत्तर दिया कि मैं इस रथ का प्राजिता हूं। इस पर वैयाकरण ने कहा कि प्रवेता बोलना चाहिए प्राजिता क्यों बोलते हो। सूत ने उत्तर दिया कि आप सूत्र की प्राप्ति को ही जानते हो। आचार्यों की दृष्टि को नहीं जानते हैं। आप देवानां प्रिय हैं।इस पर वैयाकरण ने कहा कि इस दुरुत ने हमको तंग कर दिया। इस पर फिर सूत ने कहा दुरुत यह शब्द ही नहीं बनता है। आप समझते होंगे कि वेञ् धातु से क्त प्रत्यय करने पर उत बनता है और निन्दा अर्थ में दुर को उपसृष्ट करके दुरुत बना देंगे,किन्तु यह अशुद्ध है, क्योंकि ‘सू’ धातु से क्त प्रत्यय करने पर सूत बनता है। निन्दा करनी होगी तो दुःसूत बोलना होगा। यह सब लिखने का मतलब यानी मतस्य लवः मतलवः यह है कि चारों वर्ण संस्कृत भाषा को पढ़ते थे, किन्तु मन्त्र , ब्राह्मण, उपनिषत् , आरण्यक एवं यज्ञीयपद्धति को नहीं पढ़ सकते थे क्योंकि उनके पढ़ने का अधिकार स्त्री, शूद्र एवं पतित ब्राह्मण को नहीं था न अब है।”**[18]

न केवलं भारतस्य लोकभाषा अपितु विदेशेषु अपि जनसाधारणस्य भाषारूपेण प्रचलिता आसीत्। उदाहरणार्थम् -**अद्यत्वे यत् ’वियतनाम’देशः उच्यते तद् 194 विक्रमवर्षपूर्वं चम्पा प्रदेशः आसीत्। यत्र सहस्रवर्षाणि यावत् भारतीयराजानः शासनं कृतवन्तः। ’वियत’शब्दस्य अर्थः भवति ’दक्षिणभागः’ अथ च ’अनाम’ शब्दस्य अर्थः भवति ’भूमिः’। सम्प्रति एतत् चीनदेशस्य दक्षिणभागे अस्ति। प्राक्काले एष ’चम्पा’ प्रदेशः ’सुवर्णद्वीप’ नामकः अस्माकं देशस्य भूभागः आसीत्। अद्यत्वे एष भूभागः पूर्वी-द्वीप्-समूहः इत्युच्यते। चम्पा प्रदेशे शूरवीरैः ब्राह्मणैः अरण्यमयः प्रदेशः निवास योग्यः कृतः, म्लेच्छाः ततः अपसारिताः सुव्यवस्थिता राज्यपद्धतिः तत्र संचालिता। अत्र मातृ गंगा आसीत्, या अद्यत्वे मीकांग नाम्ना प्रख्याता वर्तते। अस्याः पश्चिमतीरे कम्बुज इति नामकं स्थानं वर्तते, यत् सम्प्रति कम्बोडिया इति संज्ञया अभिधीयते। दक्षिणे श्यामदेशः, सागरीय गर्तः (समुद्री खाडी), पूर्व प्रदेशे प्रशान्त महासागरः, उत्तरे पूर्वचीनाङ्गः “अनाम” प्रदेशः आसीत्। अस्मिन् प्रथमः**

**भूपतिः "श्रीमारः" आसीत् एवं च अन्तिमः भूपतिः "महाविजयः" आसीत्। अस्यां राजपरम्परायां भद्रवर्म प्रभृतयः राजानः संस्कृतस्य प्रकाण्ड-पण्डिताः आसन्। येषां अगणिताः शिलालेखाः संस्कृतभाषायां प्राप्यन्ते। एभिः शिलालेखैः इदं सुस्पष्टतया विदितमेव यत् पूर्वस्मिन् काले संस्कृतं चम्पा प्रदेशस्य (वर्तमान "वियतनाम"देशस्य) राजभाषा आसीत्।** रामायणादयः धर्मग्रन्थाः पठ्यन्ते। स्वीयाः विचाराः संस्कृते प्रकाश्यन्ते, श्लोकादयश्च विरचयन्ते।संस्कृतभाषायाः वैज्ञानिकत्वं तु अद्यत्वे निर्विवादरूपेण विश्वे सर्वैः समादृतं विद्यते। अन्येभ्यः देशेभ्यः अपि अनेके शीर्षस्थानीयविद्वांसः बहवः शोधार्थिनः च एकस्वरेण संस्कृतस्य गौरवं स्वीकृतवन्तः। तेषां मते न केवलं आध्यात्मिकक्षेत्रे प्रत्युत प्रौद्योगिकीक्षेत्रेऽपि संस्कृतभाषा महदुपयोगिनी उपयुक्ता च विद्यते। संसारस्य सर्वोत्कृष्टमन्तरिक्षानुसंधानकेन्द्रम् 'नासा' अपि एतत् तथ्यं सयुक्तिभिः प्रमाणयति यद् इयं भाषा अन्यासां भाषाणामपेक्षया अधिक-अभिव्यक्तिपूर्णा सशक्ता सुस्पष्टा च विद्यते। इत्थं विचाराणां प्रकटीकरणस्य भावाभिव्यक्तेः च मुख्यसाधनत्वेन इयं भाषा सर्वैः अंगीक्रियते यतोहि अस्यां भाषायाम् आत्यन्तिकं शब्दप्राचुर्यम् एवञ्च अनुपमं शब्द-सामर्थ्यं विद्यते। यथा गणितस्य एकार्थबोधकत्वं भवति तथैव संस्कृतेऽपि एकार्थबोधकत्वस्य वैशिष्ट्यं सामर्थ्यं च वर्तते। अत एव जगतः भाषासमुदाये इयं भाषा मूर्ध्नि राराजते। संगणकस्य प्रक्रिया सामग्री (Computer Software Programming ) इत्यस्य कृतेऽपि संस्कृत भाषा सर्वाधिका उपयुक्ता वर्तते।[20]इत्थं विश्वभाषा समुदाये संस्कृतस्य महत्सम्माननं दृश्यते। सर्वैरपि देववाणी भृशमभिनन्द्यते नितरामादृयते। उच्यते च-**संस्कृते संस्कृतिर्झङ्कृताऽलङ्कृता, भारतीयैः चिरात् सादरं सेव्यते। राष्ट्रसंस्कारकर्त्री सतां वल्लभा प्रीर्तिगर्भाऽस्मदीया मनोधारणा।।[21]**

Central London मध्ये Saint James School अस्ति तत्र संस्कृतभाषा अनिवार्य- विषयत्वेन पाठ्यते। एतस्य कारणमपि तैः स्वस्य ब्रोशर मध्ये लिखितं यत्- **संस्कृतभाषायाः ज्ञानेन अन्या कापि भाषा सारल्येण ज्ञातुं शक्यते शुद्धोच्चारणं च ज्ञातुं शक्यते इति एतदर्थं Saint James School मध्ये पाठ्यक्रमे अनिवार्यत्वेन संस्कृतं पाठ्यते।** मैक्समूलर प्रभृतयः विद्वांसः अपि कथयन्ति- **The greatest language in the world the most wonderful and the most perfect.** वैज्ञानिकदृष्ट्या शरीरस्वास्थ्यस्य कृतेऽपि संस्कृतं लाभदायिनी भाषा अस्ति इति प्रमाणितं वर्तते। हरियाणा प्रान्तस्य मानेसरस्य नेशनल ब्रेन रिसर्च सेन्टर द्वारा फंक्षनल मैग्नेटिक रेजोनेंस इमेज़िग माध्यमेन अध्ययनं कृत्वा ज्ञातं यत् संस्कृतस्य देवनागरीलिपि पठनेन मस्तिष्कस्य दक्षिणभागः वामभागश्च उभावपि सक्रियौ भवतः। अपरत्र आग्लभाषायाः रोमनलिपि पठनेन केवलं वामभागः एव सक्रियः भवति। शोधकर्तृदलस्य प्रमुखा नन्दिनी चटर्जी सिंह अनुसंधाने प्राप्तवती यत् देवनागरी पठनेन वामभागस्य इंसुला फुजीफार्म गायरस एवञ्च फ्रंटल गायरस सक्रियः अभूवन् , सहैव मस्तिष्कस्य दक्षिणभागस्य मिडिल फ्रंटल गायरस एवञ्च आक्सीपिटल क्षेत्रमपि सक्रियः अभवत्। अपरत्र आग्लभाषायाः रोमनलिपि पठनेन केवलं वामभागस्य मिडिल फ्रंटल गायरस एव सक्रियः अभवत्।[22] इत्थं वैज्ञानिकदृष्ट्याऽपि प्रमाणी क्रियते यत् संस्कृतभाषा पठनेन स्वास्थ्यलाभो भवति। वस्तुतः भाषा विचाराणामभिव्यक्तेः साधनं भवति। एतत् साधनं यदि शरीरस्य भेषजी अपि अस्ति तर्हि मणिकाञ्चन संयोगः एव।

एषा स्वास्थ्यलाभकरी भाषा अतीव प्रभावोत्पादिका समृद्धा च अस्ति। अत एव प्रबुद्धवर्गे विशिष्टं सम्माननम् आप्नोति। साहित्यकाराः संस्कृतस्य समृद्ध-सागरे गहनावगाहनं कृत्वा अमूल्यानि मौक्तिकानि निष्कासयन्ति। एषा भाषा अत्यन्तमेव उर्वरा भाषा। किं भूगोले? किं आयुर्वेदे? किं भाषाविज्ञाने? किं धनुर्विज्ञाने? किं जीवविज्ञाने? किञ्च प्राकृतिके चिन्तने? प्रायः सर्वेषु क्षेत्रेषु विपुलं रचनासंसारं रचयितुम् संस्कृतभाषायां आढ्यं शब्दभण्डारं विद्यते। अतेव समग्रायां धरायाम् इयं प्रशंसिता वर्तते। अस्याः भाषायाः सौन्दर्यस्य दिग्दर्शनन्तु शाकुन्तलादिभिः कृताः वैदेशिकाः। अत एव गेटेमहाकवेः हृदये स्फुटितः -

**वासन्तं कुसुमं फलं च युगपद् ग्रीष्मस्य सर्वं च यद्यच्चाऽन्यन्मनसो रसायनमतः सन्तर्पणं मोहनम्।**
**एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयोरैश्वर्यं यदि वाञ्छसि, प्रियसखे! शाकुन्तलं सेव्यताम्।।[23]**

इत्थम् अनेके गुणाः यां भाषां समलंकुर्वन्ति सा भाषा समाजाय सम्यक् दिशादायिनी अतीव सरसा सर्वकालेषु उपयोगिनी अस्ति। किन्तु इदानीन्तने काले केचन जनाः संस्कृतस्य महत्तां न स्वीकुर्वन्ति। तेषां मते आग्लभाषायाः युगेऽस्मिन् अल्पीयसी व्यवह्रियमाणा इयं भाषा असामयिकी (Out Dated) अनुपयुक्ता चास्ति। ते अबोधजनाः संस्कृतस्य गौरवेण अनभिज्ञाः संस्कृतं केवलं पाठपूजनस्येव इति कथयन्ति। सौभाग्येन तादृशाः जनाः न्यूना एव सन्ति। बहुसंख्याकाः भारतीयाः वैदेशिकाश्च मुक्तकण्ठेन हृदयेन च संस्कृतस्य महत्त्वं स्वीकुर्वन्ति। ये जनाः सम्यक्प्रकारेण संस्कृते सम्भाषणं न

कुर्वन्ति, पठनमपि न जानन्ति तेऽपि संस्कृतस्य ज्ञानगरिम्णः परिचिताः संस्कृतस्य महदादरं कुर्वन्ति। ते जानन्ति यद्- भारतस्य भौतिकीप्रगतिस्तु कस्यापि भाषायाः व्यवहारेण भवितुं शक्यते किन्तु भारतस्य अस्तित्वं तु संस्कृतेन एव विद्यते। नाइजीरिया देशे तेषां स्वस्तनी भाषा नास्ति सम्प्रति तत्रत्य जनाः आंग्लभाषया एव व्यवहर्तुं बाध्याः सन्ति। सौभाग्येन वयं तथा न स्मः। स्वकीयाभिः अनेकाभिः भाषाभिः समृद्धम् अस्ति भारतम्। तासु च सर्वासु मध्यमणिरिव अस्माकं संस्कृतभाषा राराजमाना अस्ति। अथ च विश्वपटले भारतस्य गौरवस्तम्भानि अत्रत्य संस्कृतं संस्कृतिः संस्काराश्च सन्ति यतोहि संस्कृतिः अपि संस्काराः अपि प्रप्रथमतया संस्कृते एव प्राप्यन्ते, अतः संस्कृतस्य महत्त्वं स्पष्टमेव। तथा च अनया भाषया ज्ञानविज्ञानयोः द्वयोः प्रत्येकं क्षेत्रं अभिचकासति। इयम् अतुल्या अनुपमेया महदुपकारिणी आनन्ददायिनी चिरकालाद् गरिमामयी अस्ति, सर्वदैव गौरवान्विता स्थास्यति च। यथा शरीरे आत्मनः महत्त्वं भवति तथैव भारते संस्कृतस्य स्थितिः अनिवार्या अपरिहार्या च वर्तते। महीतले भारतस्य प्रतिष्ठा तावदेव स्याद्यावज्ज्ञानामृतमयी सुरभारती सेव्यते। सत्यमुक्तं केनचित्-

**सुस्थिरा साधुसाहित्यसमृद्धा सर्वसंस्तुता । सरला सर्वतोभद्रा सेव्या सुरसरस्वती।।**[24]अत एव कस्यचिदुद्घोषणास्ति-

**भारतस्योन्नतिः शान्तिर्भवेत् संस्कृतभाषया । वदामि करमुद्धृत्य सर्वेषां सदसि स्थितः।।**[25]


.संस्कृतहिन्दीकोश- वामन शिवराम-आप्टे, पृ.1051

2.प्रबन्धरत्नाकर - डॉ.रमेश चन्द्र शुक्ल- पृ. 538

3. काव्यादर्श-1.4

4.काव्यादर्श 1.33

5.निरुक्त 1.4

6.पा.सू.3.2.108

7.तत्रैव 7.2.88

8.बाल्मीकिरामायणे सुन्दरकाण्डे सर्ग 30 श्लो.18

9.वागाम्भृणी, 2014, पृ. क्र. 59, उत्तराखण्ड-संस्कृत-विश्वविद्यालय, हरिद्वारम्

10.महाभारत 12.224.55

11.संस्कृतनिबन्धशतकम् - निबन्धः 50 "संस्कृतिः संस्कृताश्रया" - कपिलदेव द्विवेदी, पृ.सं.- 180

12.महाभारत 1.56.33

13.ना.शा. 1.116

14.ना.शा. 1.119

15.ना.शा. 1-14

16.निबन्धा ललितनिबन्धाश्च- मञ्जुनाथग्रन्थावलिः2, गीर्वाणगिरागौरवम् , मङ्गलम् -2

17.शुक्लयजुर्वेद-26.2

18.पण्डितराज जगन्नाथ ग्रन्थावली, पृष्ठ-71, आचार्य मधुसूदन शास्त्री,कृष्णदास अकादमी,वाराणसी

19.तत्रैव

20.द्रष्टव्यम् - Forbs Magazine, July 1987

21.उद्धृतम्- वैश्विकसन्दर्भे संस्कृतम्, पृ. क्र. 58, अन्ताराष्ट्रिय संस्कृत शोधसम्मेलनम्, उत्तराखण्ड-संस्कृत-विश्वविद्यालयः, हरिद्वारम्

22.द्रष्टव्यं - देशविदेश दैनिकभास्कर 14 सितम्बर 2014, भोपाल

23.निबन्धा ललितनिबन्धाश्च- मञ्जुनाथग्रन्थावलिः2, पृ. 119

24.निबन्धा ललितनिबन्धाश्च -मञ्जुनाथग्रन्थावलिः-2 - अपि नाम सेयमव्यावहारिकी?- पृ.215

25.प्रबन्धरत्नाकरः - डॉ.रमेश चन्द्र शुक्ल- पृ. 527


**सहायकाचार्या (साहित्यम्) राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः**

 ISSN – 2349-3100

# अलङ्कारस्य व्यापकत्वम्

✍ **विभवकुमारझाः**

अलङ्करोतीति अलङ्कारः आभूषितं करोतीति अलङ्कारः अलं पूर्वस्य कृधातोः घञ्योगेन अलङ्कारशब्दः सिध्यति। लेटिनभाषायां अलङ्कारशब्दस्यार्थः AURUM स्वर्णः विद्यते। आभूषितकरणमेवालङ्कारः। अलङ्कारः काव्यस्य महत्त्वपूर्णमङ्गमस्ति। अलङ्कृतिरलङ्कारः।

अलङ्कारसम्प्रदायस्य प्रवर्तकः आलङ्कारिको भामहो वर्तते। अस्य सम्प्रदायस्य पोषको वर्तते भामहस्य व्याख्याकार उद्भटः। दण्डि-रुद्रट-प्रतिहारेन्दु-राजश्च सन्ति अस्य सम्प्रदायस्यानुयायिनः। दण्डिमतानुसारेण काव्यपोषकान्यङ्गानि अलङ्कार इत्यभिधीयते। रुद्रटप्रतिहारेन्दुराजावपि स्वग्रन्थेऽलङ्कारस्यैव महत्वमदुः। अलङ्कारसम्प्रदायानुसारेण अलङ्कार एव काव्यस्य जीवास्ति। तददोषौ शब्दार्थौ सगुणावन्लङ्कृती पुनः क्वापि[1]। मम्मटोक्तकाव्यलक्षणस्य समालोचतावसरे जयदेवस्तु चन्द्रालोकनामके अलङ्कारग्रन्थे उक्तवान्-

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलङ्कृती॥[2] इति।**

रूय्यकस्तु स्पष्टरूपेणालङ्कारसर्वस्वे वदति।

**तदेवमलङ्कारा एव काव्ये प्रधानमिति प्राच्यानां मतम्।**

अलङ्काराणां विकासस्य क्रमोऽयं वर्तते यत् भरतमुनिः स्वकीये नाट्यशास्त्रे अनुप्रासोपमारूपकं दीपकाख्यानां चतुर्णामेवालङ्काराणां वर्णनं चकार किन्तु कुवलयानन्दनामके ग्रन्थे अलङ्काराणां संख्या १२५ अभूत्। येन प्रकारेणालङ्काराणां संख्या परिवर्धिताऽभूत्। तेनैव प्रकारेण कालक्रमेणालङ्काराणां स्वरूपेऽपि परिवर्तनमभवत्। यथा वक्रोक्तिरलङ्कारः, भामहस्य कालादारभ्य कुन्तकस्य कालं यावत् वक्रोक्तेः स्वरूपस्य महान् विकासोऽभूत्।

अलङ्कारो नाम सौन्दर्यम्, यथा – कटक-कुण्डल-हारादिभिः आभूषणैः कामिन्याः सौन्दर्यवृद्धिः भवति। तथैव अनुप्रास-उपमादिभिः अलङ्कारैः कविताकुरूपा सत्यपि सौन्दर्यं प्राप्नोति। अलङ्कारस्य लक्षणम् आचार्यमम्मटेनापि उच्यते-

**उपकुर्वन्ति तं सन्तं येङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥[3] इति।**

कविराजविश्वनाथेनापि उक्तम्-

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।**
**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥[4]इति।**

ये शब्दार्थयोरनित्यधर्मत्वेन अतिशयशोभाकारिणः रसादीन् उपकुर्वन्ति, ते काव्ये अलङ्काराः। शरीरे यथा कटककुण्डलादीनां बाह्यशोभाऽऽधायकान् आत्मनः परोक्षधर्मत्वम्, तथैव काव्ये अनुप्रासोपमादीनाम् अलङ्काराणाम्।

आद्योऽलङ्काराणां जीवनधायकं तत्वं स्वीकरोति। भामहमतानुसारेण सर्वेषु अलङ्कारेषु वक्रोक्तिः स्थितिर्भवति। भामहस्तु काव्यालङ्कारे लिखति-

**सैषा सर्वत्र वक्रोक्तिः अनयार्थो विभाव्यते।**
**यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥[5] इति।**

वामनो वक्रोक्तिमेवार्थऽलङ्काररूपेण स्वीकृतवान् किन्तु रुद्रटः वक्रोक्तिः शब्दालङ्काररूपेण स्वीकरोति। अलङ्काराणां पर्यालोचनेदं वक्तुं शक्यते यदालङ्कारिकः गतानुगतिका एव नासीत् अपि तु सर्वत्र तां स्वकीयां मौलिकतां सुरक्षितामकार्षुः। अलङ्कारिकाः अलङ्काराणां विभाजनावसरे तेषां मूलतत्त्वोपरि विचारं कृतवन्तः। तेषामलङ्कारविभाजनस्य केचन सिद्धान्ता अपि आसन्। रुद्रटः काव्यालङ्कारनाम्नि ग्रन्थे अलङ्कारविभाजनस्य श्लेषातिशयवास्य वैषम्यानि इति चत्वारि मूलकारणानि स्वीकृतवान्। किन्तु एकावलीकारः विद्याधरः

औपम्यविरोधकार्यादीनलङ्काराणां मूलविभेदकानङ्गीकृत्यालङ्कारविभाजन सिद्धान्तेवैज्ञानिकतायाः परिचयं दत्तवान्।

युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक् इति भामहो रसवत् प्रेयादिभिरलङ्कारैः रसस्य सर्वेषां विषयाणां स्वकीये ग्रन्थे उल्लेखमकरोत् सः लिखति यत् शृङ्गारादिरसस्य स्पष्टरूपेण प्रतीतिर्भवति, तत्र रसवदलङ्कारो भवितुं नार्हति।

तथा हि-

**रसवद्दर्शितस्पटरः शृङ्गारादिरसं यथा।**
**देवीसमागमाद् धर्ममस्करण्यतिरोता यथा॥[6]इति।**

महाकविः दण्डी माधुर्याख्ये गुणेऽपि रसस्यान्तर्भावं करोति तथा चोक्तं दण्डिनाकविना-

**मधुरं रसवद् काचिद् वस्तून्यपि रसस्थितिः॥[7]इति।**

रुद्रटोऽपि काव्यालङ्कारे लिखति यत् काव्ये रसस्य निवेशाय विशेषः प्रयासः कर्तव्येति। तथाहि-

**तस्मात् तत् कर्तव्यं यत्नेन महीयसा रसैर्युक्तम्॥[8]इति।**

इह तावत् भामहोद्भटप्रभृतयश्चिरन्तनालङ्कारकाराः प्रतीयमानमर्थं वाच्योपस्कारकतया अलङ्कारपश्चिनिक्षिपं मन्यन्ते। इत्याहः रुय्यकः अलङ्कारसर्वस्वे एकावल्याः टीकाकारो मल्लिनाथः भामहादिकान् ध्वन्यभाववादिन आचार्यान् स्वीकरोति परन्त्विदमनुचितमस्ति। यतो ध्वनिसिद्धान्तेन पूर्णतः परिचिताः सन्ति यतस्मैः अप्रस्तुतप्रशंसासमासोक्ति-आक्षेपान्तर्गतं प्रतीयमानस्योनेकान् प्रकारान् अन्तर्निवेशयामास। भामहः समासोक्त्यलङ्कारलक्षणे स्पष्टतया प्रतीयमानस्यार्थस्य सत्तां स्वीकुर्वन् प्राह-

**यत्रोक्ते गम्यतेऽन्योर्थस्तत्समानविशेषणः[9]॥ इति।**
**सा समासोक्तिरुद्दिष्टा संक्षिप्तार्थतया यथा।**

पर्यायोक्तालङ्कारलक्षणेत्याह भामहः-

पर्यायोक्तं यन्येन प्रकारेणाभिधियते।
**वाच्यवाचकवृत्तिभ्यां शून्येनावगमात्मना॥[10] इति।**

अलङ्कारसम्प्रदाये प्रतीयमानस्यार्थस्य विवेचनस्याभावमेव तीव्रतयाऽनुभूयैव रुद्रटः भावनामकस्यालङ्कारस्य नवीनतया कल्पनां चकार। भावस्योदाहरणञ्चास्ति-

**ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।**
**पश्यन्त्या भवति मुर्हुनितरां मलिना मुखच्छाया॥[11] इति।**

अतएवालङ्कारसम्प्रदाये प्रतीयमानस्यार्थस्य सत्तां नूतनमस्ति परन्तु तस्मिन् सम्प्रदाये प्रतीयमानस्यार्थस्य प्रधानतया स्थितिर्नास्ति, अपि तु स एवार्थो गौणो वर्तते। इति संक्षेपेण अलङ्कारसम्प्रदायस्योपरि स्वविचारो मया उपस्थापितः।

1.काव्यप्रकाशः १.१
2.चन्द्रालोकः १.८
3.काव्यप्रकाशः ८.६७
4.साहित्यदर्पणः १०.१
5.भामहकाव्यालङ्कारः २.८५
6.भामहकाव्यालङ्कारः ३.६
7.काव्यादर्शः १/५१
8.रूद्रटकाव्यालङ्कारः १२/२
9.भामहकाव्यालङ्कारः २.७९
10.भामहकाव्यालङ्कारः ३.८
11.रूद्रटकाव्यालङ्कारः ७.९

**साहित्यविभागः,कामेश्वर सिंह संस्कृत विश्वविद्यालय, दरभंगा।**

 ISSN – 2349-3100

# कविकीर्तेः अक्षय्यता

✍ श्री. जीतेन्द्रकुमारगुप्तः

अपारे काव्यसंसारे कविरेव प्रजापतिः। कवेः कर्म काव्यम्। किं नाम कवित्वम् ? कविः क्रान्तदर्शी। यत्र यत्र क्रान्तदर्शित्वं तत्र तत्र कवित्वम्। कान्तदर्शित्वाद् व्यापकज्ञानवत्त्वकारणादेव यजुर्वेद इशोपनिषदि चेश्वरः कविरिति स्तूयते। कविर्मनीषी परिभूः[1] इति। अपि च मुण्डकोपनिषदि सत्यदर्शिनः तत्त्वार्थविदश्च कवय इति निगद्यन्ते।

तथा च— **तदेतत् सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यन्। तानि बहुधा सन्ततानि।[2] इत्युक्तम्।**

**कवित्वं जीवनं ज्योतिर्दर्शनं प्रतिभात्मकम्। वोद्ध्रीकर्त्रित्वशक्तित्वं ज्ञानसारग्रहैकदृक्॥[3]इति च।**

यत्र दिव्यम् अलौकिकं प्रतिभामूलकं कल्पनाजन्यं वा ज्ञानं संगच्छते तत्र कवित्वं स्वीक्रियते। यः तत्त्वदर्शने क्षमः दिव्य**ज्ञान**परिष्कृतश्च स एव कविः। कविशब्दः "कवृ वर्णे" इति धातोः सिद्ध्यति। यः तथ्यवर्णने, वस्तुवर्णने, तत्त्वार्थचित्रणे च प्रभवति स कविः। तदुक्तं मम्मटेन काव्यप्रकाशे—

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्। नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥[4] इति।**

कवेर्भारती जगत्त्रयलोचनभूता लोकोपकारिणी च अत एव सा प्रशस्यते। सा घोरे निशीथे ज्ञानज्योतिर्ज्वलयति, अज्ञानान्धतमसं ध्वंसयति, मनोव्यथाम् अपहरति, शोकानलं शमयति, दुःखसन्तापं च दमयते। यतो रससिद्धानां कवीनां यशः काव्यजरामरणजं भयं न लक्ष्यते। भर्तृहरिणाऽपि उक्तम्—

**जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः। नास्ति येषां यशःकाये जरामरणजं भयम्॥ इति।**

कवित्वं न सुकरं कर्म। पूर्वपुण्यार्जितसंस्कारवशात् प्रतिभासम्पन्नत्वं, तदैव कवित्वम्, कवित्वे च शक्तिमत्त्वम्। यथा—

**नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभाः। कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभाः॥[5]इति।**

एतस्मात् कारणादेव साहित्यसंगीतकलाविहीनस्य साक्षात् पशुत्वम् अभिधीयते—

**साहित्यसंगीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः। तृणं न खादन्नपि जीवमानस्तद् भागधेयं परमं पशूनाम्॥इति** कवित्वविषये काव्यालंकारे अपि वर्णितम्, यथा—

**उपेयुषामपि दिवं सन्निबन्धविधायिनाम्। आस्त एव निरातंक कान्तं काव्यमयं वपुः॥[6]इति।**

**रुणद्धि रोदसी चास्य यावत् कीर्तिरनश्वरी। तावत् किलाऽयमध्यास्ते सुकृति वैबुधं पदम्॥[7]इति च।**

शरीरात् प्राणाः गताः स्युः। परन्तु सत्काव्यरचयितॄणां काव्येषु कदाऽपि क्षयः न भवति। कवेः कीर्तिः दिवंगतावस्थायामपि सत्काव्यरचयितॄणां रम्यं काव्यशरीरं निर्विकारः एव भवति तथा यावत् तस्य कवेः अक्षय्यकीर्तिः पृथिव्यामाकाशे च व्याप्ता वर्त्तते। तावत् स पुण्यात्मा देवपदम् अलंकरोति।(६-७)

श्लोके "निरातंक" शब्दः प्रयुक्तः अस्ति, यस्यार्थः—निर्भयः-स्वस्थः-भयेनमुक्तः। अत्र अस्यार्थः न्यूनाधिक्यरूपे विकाररहितः तथा निर्विकारः भवति एव।

कविकीर्तेः अक्षय्यतायाः उल्लेखः स्थले स्थले प्राप्यते। "शाङ्र्गधरपद्धत्याम्" आवागमनशीलसंसारे कविकीर्तिः निरपायिनी (हानिरहिता, अनश्वरा च) कथ्यते। तदुक्तम्—

**याता यान्ति च यातारो लोकाः शोकाधिका भुवि। काव्यसम्बन्धिनी कीर्तिः स्थायिनी निरपायिनी॥[8] इति।**

भारतीयसमाजे द्वे व्यवस्थे स्तः स्वर्गनरकव्यवस्था मोक्षव्यवस्था च। मोक्षे जीवात्मा सर्वथा अवागमनबन्धनात् मुक्तः

भवति, किन्तु स्वर्गनरकव्यवस्थायां जीवात्मा स्वपुण्यानां फलमश्नुते। तेषां क्षीणावस्थावत् उपभोगं करोति। पुण्यानां क्षीणानन्तरं स्वर्गात् मर्त्यलोकं प्रति पुनरागच्छति।गीतायां उच्यते—

**क्षीणे पुण्ये मर्त्यलोकं विशन्ति** [9]**इति।** अर्थात् पुण्यानां क्षीणानन्तरं जीवात्मा स्वर्गात् मर्त्यलोकं प्रति आगच्छति किन्तु सत्कवीनां काव्यजन्यपुण्यं कदापि न क्षीयते तद् स्थायी निरपायी च भवति। महाभारतेऽपि वर्णितम्—

**दिवं स्पृशति भूमिं च शब्दः पुण्यस्य कर्मणः। यावत् स शब्दो भवति तावत् स्वर्गे महीयते॥**[10] **इति।**यथा -सम्पूर्णविश्वे महाकवेः कालिदासस्य कीर्तेः स्वीक्रियन्ते। कालिदासस्य सप्तैव कृतयः प्राधान्येन स्वीक्रियन्ते। यथा-

(क) नाट्यग्रन्थाः—१.अभिज्ञानशाकुन्तलम्, २.विक्रमोर्वशीयम्, ३.मालविकाग्निमित्रम् च।

(ख) काव्यद्वयम्— रघुवंशम्, कुमारसम्भवम् च।

(ग) गीतिकाव्यद्वयम्- मेघदूतम् ऋतुसंहारम् च। कालिदासस्य कीर्तिः सम्पूर्णविश्वे वर्तते। उक्तं च—

**काव्येषु नाटकं रम्यं नाटकेषु शकुन्तला। तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्॥**[11] **इति।**

कालिदासो वैदर्भीं रीतिं वृणुते। अतस्तस्य शैल्यां माधुर्यं लालित्यम् अलङ्कारसमवेतत्वं प्रसादत्वं समासाल्पत्वं च प्रतिपदं समीक्ष्यन्ते।

अलङ्कारनिबन्धकर्तारः प्राचीना अर्वाचीनाश्चाचार्या बहवो भवन्ति । तेषु यथा- भरत-भामह-दण्डी-वामन-भट्टोभट्ट-रुद्रट-भट्टनायक-आनन्दवर्धन-महिमभट्ट-विश्वनाथ-जगन्नाथादयः प्रमुखाःभवन्ति। तेषां कृतयः अद्यापि अक्षय्या वर्तन्ते।

**उपसंहारः-**उपर्युक्तवर्णनस्य निष्कर्षः अयं भवति यत् सर्वेषां कवीनां कृतयः कदापि क्षय्या न भवन्ति।

तदेव यथोक्तं काव्यालङ्कारे भामहेन—**धर्मार्थकाममोक्षेषु वैचक्षणं कलासु च्। करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम्॥**[12] **इति।**तथा च—**धर्मादिसाधनोपायः सुकुमारक्रमोदितः। काव्यबन्धेऽभिजातानां हृदयाह्लादकारकः॥**[13] **इति।** अनेन स्पष्टमेतदक्षय्यत्वं सत्कविकाव्यानामिति।

1 यजु. ४०.८

2.मुण्डक्.१.२.१.

3.कपिलः

4.काव्यप्रकाशे

5.३३७.४ –अग्निपुराणम्

6 काव्यालंकारे(६)

7 काव्यालंकारे(७)

8 शाङ्गर्धर पद्धत्यां

9 गीतायां

10 महाभारते

11 अभिज्ञानशाकुन्तलम्

12 काव्यालङ्कार-१.

13 वक्रोक्तिजीवितम

**शोधच्छात्रः, साहित्यविभागराष्ट्रियसंस्कृतसंस्थानम्, क.जे सोमैयासंस्कृतविद्यापीठम्, मुम्बई।**

# विवाहमेलापकीयं कूटैतिह्यम्

✍ डॉ गणेशत्रिपाठी

सर्वसंस्कारेषु विवाहसंस्कार: सर्वतोभावेन मुख्यत्वं भजते। विवाह: समग्रजीवनस्याधारभूत: स्तम्भ: विद्यते। एतच्च संस्कार आजीवनं सुखमयं कालुष्यरहितं सन्ततिसहितं च चलेदिति कामनया वेदस्याङ्गभूतस्य ज्योतिषशास्त्रस्य प्रतिपदं वधूवरयोर्मध्ये ग्रहजन्यनक्षत्रजन्यानां प्रभावज्ञानार्थं पुरा ऋषिभि: मेलापकव्यवस्था प्रतिपादिता । व्यवस्थामस्यां मुख्यत्वेन बहुविधानां कूटानामावश्यता प्रभवति । किन्तु एतदतिरिक्तरâपेण प्राधान्येन वर्णवश्यतारायोनिग्रहगणभकूटनाडीकूटानां व्यवहार: भवति। साम्प्रतं लोके इयमेव रीति: प्रचलिता विद्यते। किन्तु कदा प्रभृति: लोके रीतिरिय समुद्घाटिता प्रचलिता विस्तृतरâपेण नैव ज्ञायते । तस्यैव क््रâमज्ञानार्थं विविधग्रन्थावलोकनात्परमधोलिखितरâपेण प्रस्तुतमस्ति । कूटैतिह्यम् एतद्भिन्नमपि भवितुं शक्नोति । यावती मन्मति: तावती प्रस्फुटिता विद्यते। सर्वप्रथमं कूटस्यार्थ: प्रतिपाद्यते।

**कूटार्थ: -**

विविधभावानुरोधेन कालपरकेन च कूटार्थः भिन्नः भिन्नः भवति। वाचस्पत्यमिति ग्रन्थे अपपादे दानाभावे दाहे मन्त्रणे प्रच्छादने चेत्यादिषु कूटशब्दः प्रयुक्तो वर्तते। अथ च कूटयति दग्धीकरोति शापप्रभावेन सापराधानिति। अन्यदपि कूटशब्द: समूहार्थे प्रयुक्तो भवति यथा हि अन्नानां कूटः समूहः अन्नकूटः तादृशः पर्वतोऽयम् अन्नकूटपर्वत:। ततश्च कूटपदेन संख्यापि गृह्यते यथा हि पर्वतशृङ्गे चित्रकूटः त्रिकूटः । अथ च कूटेन नयपदमिति भवति यथा युद्धादिषु कूटनीतिः । बृहज्जातके मुहुर्मुहुः कूटपदमागतं वर्तते किन्तु तत्र मेलकं पदं नास्ति तत्र कूटं पण्यद्रव्याणां प्रतिरुपक्रियासक्तमिति । अत्र ज्योतिषप्रसङ्गे तु कूटपदेन संख्या मेलकं च प्रयुज्यते यथा भकूटमिति तथा च भाविवधूवरयोर्ग्रहनक्षराशिनामाधारेण मेलापकं येन क्रियते तत् कूटमिति भवति । कूट एव वर्गः, योगः, प्रीतिः घटना आदयोऽप्युच्यन्ते। मेलापनस्या एव व्यवस्थायाः कूटमेलापनं, विवाहमेलापनम् आनुकूल्यं चादय उच्यन्ते।

**कूटैतिह्यम् –**

यस्मात् कालाद् ज्योतिषशास्त्रं लोके प्रसरितमासित् तस्मादेव कालाद् नृणां शुभाशुभपरिपाकज्ञानाय विविधधाराः प्रवर्तिताः बभुवुः । अस्यामेव परम्परायामागतविवाहमेलकविचारोऽपि तद्वदेव पुरातनीयमस्ति । प्राचीने हि वैदिके काले न हि तादृशः विचारः प्रवर्तित आसीत् यादृशः विचारः साम्प्रतिके समये विवाहमेलके वर्तते । साम्प्रतमागतकूटविचारस्य मूलाधारस्तु वैदिक एव परिलक्ष्यते । ऋग्वेदे सूर्याविवाहप्रसङ्गः विद्यते । अथ च विवाहात्प्रागेव वधूवरयोः कुल-शील-वपु-यश-विद्या-वित्त-सनाथता-एतेषां गुणाणां ज्ञानं विवाहात्प्रागेव वूâटस्यारम्भस्थानं जायते। यथा –

**कुलं च शीलं च वपुर्यशश्च विद्यां च वित्तं च सनाथतां च ।**
**एते गुणाः सप्त परीक्ष्य देयाः कन्या बुधैः शेषमचिन्तनीयम् ।।[1]**

वैदिककाले स्पष्टरूपेण कूटस्योल्लेखः नैव प्राप्यते किन्तु अतः परं स्मृतिकाले मनु-पराशर-शातातपादि स्मृतिषु किञ्चिदस्यारम्भनिदर्शनमवलोक्यते। स्मृतिसंग्रहरूपे वीरमित्रोदयस्य संस्कारप्रकाशे विविधाचार्याणां कूटजन्यानां मतानि प्राप्यन्ते। तत्रैव शातातपस्य सर्वप्रथमं कूटवचनं प्राप्यते। तत्र सर्वप्रथमं गोत्रविचारः,द्वितीयं सप्तमपञ्चमविचारः, तृतीयं भकूटविचारः भवति। अतः प्रतीयते यत् कूटारम्भस्तु स्मृतिकाले बभूव। तत एव संहितादिषु ग्रन्थेषु प्रमुखेन बभूव। यथा –

**आदौ गोत्र शुद्धिः स्यात्ततस्सप्तमपञ्चमम् । राशिकूटं ततश्चैव त्रेधासम्बन्धलक्षणम् ।।[2]**

ज्योतिषस्याष्टादशप्रवर्तकाः सन्ति ते सर्वेऽपि संहिताशास्त्रस्त वेत्तारः सन्ति । अतस्तेषां संहितासु विवाहार्थं कूटविचारः प्राप्यते किन्तु तेष्वनेकानां ग्रन्थानां नितरामभावो विद्यते । यत्र कुत्रापि प्रक्षिप्तरूपेणैव तेषां वचनानि प्राप्यन्ते । स्पष्टरूपेण तु अष्टादशप्रवर्तकेषु वसिष्ठसंहितायामेव विशदेनाष्टादशकूटानामुल्लेखः प्राप्यते । हिम्मतराम ओझा महोदयेनोक्तं यत् कूटैतिह्यं चतुःसहस्रं पुरातनीयमस्ति । आश्वलायनगृह्यसूत्रे प्रोक्तं यत् ज्योतिःशास्त्रोक्तराशिनक्षत्रादिघटितविचारोऽपि शुभाशुभादिज्ञानहेतुः । यतश्च –

**राशीशयोः सुहृद्भावे मित्रत्वे चांशनाथयोः । गणादिदौष्ट्येप्युद्वाहः पुत्रपौत्रप्रवर्धनम् ।।**[3]धर्मसिन्धौ ग्रहमैत्रि-गण-भकूट-नाडी इति चत्वार एव कूटानि वर्णितानि सन्ति । एवमेव शौनक-नारद-गर्ग-अत्रि-व्यासादीनां वूâटविचारः वीरमित्रोदये प्राप्यते येन प्रतीयते यत् स्मृतिकाले विवाहार्थं कूटानां विचार भवति स्म । तद्यथा –

**जाङ्गले तु चतुर्माला पाचाले पंचमालिका । त्रिमाला सर्वदेशेषु विवाहेषु निजं मतम् ।।**[4]

अनार्षपरम्परायां सर्वप्रथमं क्रमबद्धरीत्या वराहेण विवाहमेलकार्थमष्टकूटानां प्रयोगः कृतः । भट्टोत्पलटीकायां प्राप्यते यत् विवाहादीनां च कर्मणां विवाहोपनययचूडाकरणगृहप्रवेशानां करणं अज्ञातेत्यादि विवाहपटलम् । प्रायः सर्वे विचिन्तयन्ति यत् वराहस्य विवाहपटलं नोपलब्धमिति किन्तु नैतत्समीचिनम् । यतो हि वराहवचनं सर्वत्रैव प्राप्यते । तत्र मिथिलादेशे वराहकृतः माहेन्द्रादियोगः प्रसिद्धः । एवमेव मुहूर्त्तचिन्तामणेः पीयूषधाराटीकायां वराहचनं प्राप्यते । यथा हि –**आद्यैकनाडी कुरुते वियोगं मध्याख्यनाड्यामुभयोर्विनाश: । अन्त्या च वैधव्यमतीव दु:खं तस्माच्च तिस्र: परिवर्जनीया: ।।**[5]एवमेव सारसमुच्चये विवाहपटले वराहस्यानेकवचनानि प्राप्तानि भवन्ति येन प्रतीयते यत् वराहस्य विवाहपटलं साम्प्रतमपि जीवितमस्ति । विशिष्टं तत्र शौनकस्य वराहस्य सममेव विवाहपटलं प्रकाशितमस्ति । एवमेव क्वचिद् बृहत्संहितायामपि विवाहपटलं प्राप्यते । विद्यामाधवीयेऽपि वराहस्य वचनानि विवाहपटलसम्बद्धानि प्राप्यन्ते । सारसमुच्चये अष्टकूटस्य प्रामाणिकं वराहवचनम् एवमस्ति –**वर्णो वश्यं तारा योनिग्रहगणभवूâटनाडीभिः ।पाणिग्रहणे प्रोक्तं यथोत्तरं तत्तु बलयुक्तम् ।।**[6]

अतः स्पष्टरूपेण प्रतीयते यत् वराहकालादेवाष्टकूटानां व्यवस्था लोके प्रचलिता प्रसरिता अस्ति । अतः परं लल्लपप्रणीतरत्नकोशे श्रीपतिप्रणीतरत्नमालायां भोजप्रणीतराजमार्तण्डे कालीदासप्रणीतेज्योतिर्विदाभरणे शिवराजरचितज्योतिर्निबन्धे नारायणविरचितमुहूर्त्तमार्तण्डे रामप्रणीतमुहूर्त्तचिन्तामणौ विट्ठलप्रणीतमुहूर्त्तकल्पद्रुमे प्रश्नमार्गे इत्यादि ग्रन्थेषु विविधकूटानां विशदं वर्णनमुपलभ्यते । एवमेव प्रकारेण साररूपेण कूटैतिह्यम् अवलोक्यते । तथा चान्ते –

**ग्रहवत्सरशुद्धिश्च नार्तं कालमपेक्षते ।स्वस्थे सर्वमिदं चिन्त्यमित्याहु भगवान्भृगुः ।।**[7]

1.यमः विर्मित्रोदयः संस्कारप्रकाशः पृष्ठ ७५४

2. तत्रैव

3. फलित्विकास रामायत्न

4. बृत्दैवज्ञारनजन ७१.३९१

5. मुहुर्तचिन्तमनि प्रमितक्षर टिका ६.३४

6. सारसमुच्च्य पृष्ठ ११

7. राज मार्तण्ड ३८८

ज्योतिषविभाग: मुक्तस्वाध्यायपीठम् राष्ट्रियसंस्कृतसंस्थानम् नवदेहली

# ब्रह्मचर्याश्रमस्य कर्त्तव्यम्

✍डा.आशीष कुमार चौधरी

मनुजस्य सर्वप्रथमाश्रमः ब्रह्मचर्याश्रमः तंत्र आदौ बालानां ज्ञान विज्ञान कौशलस्य विकासः भवति अर्थात बालकस्य सर्वांगिण विकासः भवति। परन्तु ब्रह्मचर्य आश्रमे मुख्य कार्यं भवति अध्ययन्न सह इन्द्रियसंयमः, चरित्रनिर्माणम्, कठोर साधनाः अनुशासनं अर्न्तगते तिष्ठति यद्वारा तस्य भावि-जीवनं सुखमयं आनन्दमयं भवति।

ब्रह्मचर्याश्रमस्य अर्थः एवं भवति ब्रह्म चर्यः इति **शब्दद्वयोः** मिलने ब्रह्मचर्यस्य उत्पत्तिः ब्रह्म इति शब्दस्यार्थः महान् **यर्थ** इति विचरणं इत्यर्थः अर्थात ईश्वर प्राप्त्यर्थं मार्गन्वेषणम्। एवश्च अन्यैक मुख्योद्देश्यः आसीत आश्रमस्य नियमपालनैः सह वेदादि शास्त्रस्य अध्ययनं न करोति तस्य ब्रह्मचर्य आश्रमस्य साफल्यं न भवति।

स्वामी दयानन्द सरस्वती स्वस्य सत्यार्थप्रकाश इति ग्रन्थ लिखितवन्तः – जगतीधन्दः 48 अक्षर विशिष्ठः भवति यदि कोऽपि ब्रह्मचारी 48 वयः पर्यन्तं ब्रह्मचर्यं पालयति सः जनः पूर्ण बलवीर्य सकलज्ञान विशारदः- सकलऐश्वर्य सम्पन्नः भवति तद् सहितं सैव जनः यशस्वी-तेजस्वी विभूय 400 वर्ष पर्यन्तं जीवितं तिष्ठति।

सैव ब्रह्मचारीं प्राचीनकाले भिन्नः भिन्नः नाम्वी **आद्वयन्ति** यथा – विद्यार्थी – छात्रः – बालकः – इत्यादयः,

**महाभारते विद्यार्थी लक्षणम् –**

आलस्यं मदमोहौ च चापलं गोष्ठिरेव च । स्तब्धता चाभिमानित्वं तथाऽत्यागित्वमेव च ।
एते वै सपृदोषाः स्युः सदा विद्यार्थीनः मताः ।।सुखायिनिः कुतोविद्या कुतो विद्यार्थी सुखम् ।
सुखार्थी वा त्यजेद्विद्यां विद्यार्थी त्वां त्यजेत्सुखम् ।।

एतद् सर्वं विद्यार्थीनां दोषों इति महाभारते वर्णनं दृश्यते । एवञ्च यदि प्रकृत विद्यार्थी सुखं अनुसरति तस्य विद्या न भवति ।

ब्रह्मचर्य पालनार्थं तदैव ब्रह्मचर्य त्रयः विभागाः कृताः यथा प्रथमः मध्यमः उत्तम इति। आदौ प्रथमः 17 वर्ष पर्यन्तं प्रथमः, 26 वर्ष पर्यन्तं मध्यमः, 44 वर्ष पर्यन्त उत्तमः इति। एवं स्त्रीणां निमित्तं 17 वर्ष पर्यन्तं ब्रह्मचर्यः पालनियः।

मनुष्यदेहे अन्नरसःबृद्धी निमित्तं यः पुरुषः अवस्थानं करोति सैव पुरुष यज्ञ। सः अत्यन्तं शुभः विशिष्ट शक्ति सम्पन्नःभवति तदर्थं सामान्यतः 24 वर्ष पर्यन्तं ब्रह्मचर्यः पालनीय इति । कारणं गायत्री महामन्त्रे 24 अक्षराणि भवन्ति तदैव दृष्टवा सामान्यतः एतावत पर्यन्तं ब्रह्मचर्यः आश्रमे स्थित्त्वा पालने सति तस्य गृहस्थाश्रमस्य साफल्यं आनन्दपूर्णं भवति। एवश्च सैव ब्रह्मचारी 70 अथवा 80 वयः पर्यन्तं रोग्णाविना एव समाजे स्वस्य जीवनं निर्वहति। यथा **<u>धान्दोग्योपनिषदि</u>** श्रुयते –

पुरुषोवाच यज्ञस्तस्य यानि चतुर्वंशति वर्षाणि तत्प्रातः सवनं, चतुर्विंशत्यक्षरा गायत्री प्रातः सवनं तदस्य वसवोऽन्वायत्राः प्राणा वाव वसव एते **ह्वीदं सर्वं वासयन्ति ।।**

अन्यत्र एवं मपि श्रुयते – यदा बालकः आश्रमं प्रति समायाति तदा आदौ तस्य उपनयन संस्कारः भवति – ब्राह्मणः क्षत्रियः तथा वैश्यःएतेषां सर्वेषां उपनयन संस्कारः पश्चात् विद्यारम्भः भवति। उपनयन इति शब्दस्य साक्षाते अर्थः एवं भवति- गुरु समीपं गत्त्, वेदादि शास्त्रस्य अध्ययनं उपनयनमिति। ब्राह्मणः क्षत्रियः वैश्यः एतेषां त्रयाणां क्रमेण वयः भवति – 8,11,12 इति। तद् आरभ्य 25 वयः पर्यन्तं ब्रह्मचर्य आश्रमे स्थित्वा विभिन्न वेदादि शास्त्रस्य अध्ययनं कृत्त्वा शास्त्र विशारदः भवति अग्रे गत्त्वा गृहस्थाश्रमे प्रविशति एवं साफल्यं भवति। तत्र ब्रह्मचर्य आश्रमे बालकस्य सर्वांगिण विकीसः भवति एवं तस्मिन् समये बालिकेभ्यः पूरे एव तिष्ठति यद्वारा तस्य मनः एकेन्द्रिकं भवति एवं इन्द्रिय-संयमता मनसि दुःश्चिन्ता न आयाति तदैव ब्रह्मचर्य आश्रमस्य विशेषः। प्रकृते अस्मिन् आश्रमे अध्ययन अध्यापन विषये गुरुत्व ददाति, तदर्थं भर्तुहरिमहोदयेन उक्तम् –

एतदर्थं सर्वप्रथमं विद्यादिशास्त्रस्य अध्ययन-निमित्तं ऋषयः आदी ब्रह्मचर्य आश्रमस्य निर्वाणः अकुर्वन्।

**सूत्र साहित्य में वर्णित भारतीय समाज एवं संस्कृति** इति पुस्तके वर्णनं दृश्यते – सप्तवयसिबालकः विद्यया अभिलाषः स्थापयति अष्टवयसिबालकः दीर्घायुः कथं भवामि इति चिन्तयति, नवमवयसि बालकः तेजस्वी एवं पौरुषप्रात्यर्थं इच्छति। अन्नप्रात्यर्थं दशमवयसिबालकः कामयति इन्द्रियेभ्यः शक्तिः सम्पादयति एकादशवयसि बालकः पशुआदि सम्पत्रि

कामयति द्वादशवयसम्पन्नः बालकः तदनन्तरमेव तस्यैव बालकस्य उपनयन संस्कारः करणीयम् । एवं उपनयन संस्कारः अनन्तरं विद्यारम्भः करणीयः, स्वामी दयानन्द सरस्वती महोदयेन अपि उक्तम् – उपनयन संस्कार अनन्तरं एवं विद्यारम्भः प्रयत्नति स्म । एवं जन्मना आरभ्य 48 वयः पर्यन्तं ब्रह्मचर्य आश्रमे स्थातुं शक्यते किन्तु न्युनातिन्युनं तु 25 वयः पर्यन्तं ब्रह्मचर्य आश्रमस्य उपयुक्तः वयः इति।

**<u>ब्रह्मचारीणां दिनचर्या –</u>**

ब्रह्मचारी ब्रह्ममुहुर्त्ते उत्थाय आदौ गुरु समीपे गत्वा स्वनाम उक्त्वा प्रणाम करोति एवं गुरु आशीर्वाद मणि करोति ततः परं ब्रह्मचारी स्वस्य नित्यकर्म कृत्वा यज्ञनिमित्तं काष्ठसंग्रहार्थं वनं गच्छति काष्ठ संग्रह्य यज्ञादि कार्य सम्पादयति ततः परं लघुभोजनं कृत्वा पूर्व पठित शास्त्रस्य अध्ययनं करोति एवं नूतन पाठस्य आरम्भ गुरुः करोति पुनः मध्याः पर्यन्तं पठन कार्य प्रचलति ततःपरं मध्यान्न भोजनं कृत्वा पुनः सायंकाल पर्यन्तं शास्त्राध्ययनं प्रचलित, एवं मध्ये मध्ये भिक्षाजनि निमित्तं ग्रामन्तरं गच्छति, एवं गुरोः आवश्यकं जलंपदि आनिय ददाति । एवं गुरोः निर्देशसर्वमऽपि कार्यं ब्रह्मचारी सम्पादयति । एवं ब्रह्मचारी सम्पादयति । एवं ब्रह्मचारी सर्वदा गुरोः अनुगच्छति गुरु यत् किमश्रपि वदति तत्करोति । आश्रमे स्थित पशुपक्षिणां मपि सेवां ब्रह्मचारीणः कुर्वन्ति, एवं विशिष्ट एतत् अस्ति ब्रह्मचारी कदाऽपि सूर्योदयस्य दर्शनं न करोति ।

सायंकाले प्रतिदिनं मौनेन सन्ध्या उपास्ते ब्रह्मचारी, एवं प्रतिदिनं प्रातः काले अग्निहोत्रं जुहोति, आश्रमस्य चतुःपार्श्वः परिस्कारं करोति एवं प्रकृतेतु विद्यादि शास्त्रस्य अध्ययन निमित्तं गुरुकुल एवं उत्तमोत्तम स्थलः । अत्र यतकिमपि कार्यं भवति तद् सर्वं नियमेन सम्पादयति, तद्वारा ब्रह्मचारीं समयानुवर्तिता विषये ज्ञानं सम्पादयति आश्रमस्य एकं विशेषकार्यम् ।

**गुरुशिष्ययोः सम्बन्धः-**

भारतीय शिक्षाका इतिहास इति पुस्तके वर्णनं एवंमसि आचार्यः ब्रह्मचारीणां अध्यात्मिक पिता इति, कारणं विद्यार्थीनां मानसिकं बौद्धिकं-शारीरिकं विकासयति गुरुः एवं ईश्वरप्राप्ति निमित्तं यत् मार्गं अपेक्षते अर्थात् यथा सहजतया ईश्वरप्राप्ति भवति तद् विषये ज्ञान प्रयच्छति। अत्र आचार्यः अथवा गुरुः शिष्यः प्रतिदिनं भगवतां प्रध्यन्ते उभयोः मंगलार्थम् अर्थात गुरुः स्व शिष्यस्य मंगलं कामयति शिष्यः स्वस्य गुरोः मंगलम् कामयति **<u>यथा पनिषद श्रुयते –</u>**

एवं तत्रैव श्रुयते आज्ञा गुरुणां विचरणीया अर्थात गुरुः यदाकदापि यत्र कुत्रापि यत् किमपि आज्ञां ददाति तद् अविचार्यः एव करणीयः इति एतत् कथनात एवं विचार्यते एत् गुरुः कदापि स्व शिष्याय कृते असमिचिनं मार्गं न प्रदर्शयति उभय उभयोः मंगलं यच्छन्ति ।

तथैव भारतीय शिक्षा की सम-सामायिक समस्याएँ इति इतिहास ग्रन्थे वर्णनं दृश्यते यत् शिष्यः स्वस्य गुरुं सर्वदा ब्रह्माः-विष्णुः- महेश्वराः इति चिन्तयति यथा श्लोकः –

गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देव महेश्वरः ।
गुरुः साक्षात् परंब्रह्मः तस्मै श्री गुरवे नमः ।।

तर्हि किं नाम गुरुः इति चेत् <u>मनुस्मृतौ श्रुयते –</u>

दुशन्दस्तु अन्धकारोस्ति दुशन्दस्तुनिरोधकः । अन्धकारान्निरोधित्या गुरुरितिभिधीयते ।।

एवं <u>महाभारते विद्यार्थी लक्षणं</u> श्रुयतेः-सत्ये रतानां सततं दान्तानामूर्द्धरेतसाम् ।ब्रह्मचर्यं दहेप्राजन् सर्वपापान्युपासितम् ।।

एवमेव प्राचीनकाले गुरूशिष्ययोः सम्पर्कः निविडः आसीत् तदर्थमेव साक्षात् शिष्यः गुरोः पार्श्वे स्थित्त्वा गुरोः सेवां चकार इति यथा पितापुत्रयोः सम्बन्धः वर्तते तथैव गुरूशिष्ययोः सम्बन्धः वर्तते तदर्थमेव गुरुः शिष्यस्य अध्यात्मिक पिता इति उच्चते।

**गुरुकुले गुरुशिष्ययोः कार्यकलापः-**

प्रागशः प्रत्येकस्मिन् आश्रमे प्रातः उत्थाय परस्परं अभिवादन ज्ञापयन्ति स्म, शिष्यः गुरुं प्रति स्व अभिवादनं ज्ञापयति गुरुः शिष्याय आशिर्वादं ददाति । ततः परं ब्रह्मचारी स्वस्य नित्य नित्यकर्म **परिसमात्य** आश्रमचर्तुपार्श्वं परिस्कारं करोति स्म । तदनन्तरं वनं गत्त्वा काष्ठानि आनीय यज्ञादिकार्यं सामूहिक रुपेण समापयन्ति, ततः परं पठित विषयं आलोचयन्तिस्म, ततःपरं लघुभोजनं परिशील्य आदी गुरुं ददन्ति तदनन्तरं स्वयं खादति। तदपश्चात् नूतनपाठश्च आरभकुर्वन्ति स्म । मध्यान्हःपर्यन्तं प्रचलित स्म तदनन्तरं मध्यान्हः भोजनं कुर्वन्ति ततः प्राक ब्रह्मचारी भिक्षा अर्जयितुं ग्रामं प्रति-गच्छति । प्रत्येकं दिनंगुरुशिष्योभययोः मिलित्त्वा प्रातः सायं सन्ध्या उपासनां कुर्वन्ति स्म । एवं प्रत्येक दिनं गुरुः स्वशिष्याय कृते सर्वदा उपदेशं ददाति यथा अत्यभाषी – क्षमाशीलं – लज्जशीलं – जितेन्द्रियः अथक परिश्रमी –

ईर्ष्यारहित एवश्च अहेकाररहितः भवितुं उपदेशं प्रत्येहं ददाति । एवं रात्रि भोजन-समाप्त शिष्यं गुरुं प्रति सेवां शुश्रुषां कुर्वन्ति स्म । एवं रात्रि शयनप्रर्थनां समाप्त शयनं कुर्वन्ति स्म ।

अन्त्येवासिनां खाद्यपदार्थः-

